ВЪ.

... стр. I—II
..... 1
..... 21
..... 29
..... 53
щейся
..... 83
..... 97
..... 103
вѣкѣ. —
бліотеки
. Розена.)
..... 115
т. Коми-
Военно-
.livkine—
eber das
– Ueber
– Ueber
Sanskrit

каго Общества.
*Толстой.*

., № 12.

# ЗАПИСКИ

## ВОСТОЧНАГО ОТДѢЛЕНІЯ

### ИМПЕРАТОРСКАГО

## РУССКАГО АРХЕОЛОГИЧЕСКАГО ОБЩЕСТВА

---

ИЗДАВАЕМЫЯ ПОДЪ РЕДАКЦІЕЮ УПРАВЛЯЮЩАГО ОТДѢЛЕНІЕМЪ

Барона **В. Р. Розена.**

---

ТОМЪ IV. 4: 3-4

**ВЫПУСКИ III и IV.**

(СЪ ПРИЛОЖЕНІЕМЪ ДВУХЪ ТАБЛИЦЪ.)

С.-ПЕТЕРБУРГЪ.
ТИПОГРАФІЯ ИМПЕРАТОРСКОЙ АКАДЕМІИ НАУКЪ.
Вас. Остр., 9 лин., № 12.
**1890.**

# Спасеніе по ученію позднѣйшихъ буддистовъ.

Въ основаніи настоящаго изслѣдованія положено сочиненіе Çāнтидевы Бодхичарјāватāра. Для изданія этого текста авторъ пользовался слѣдующими рукописями:

I. L[1]. Рукопись библіотеки India Office въ Лондонѣ; она была вывезена изъ Непала Годжсономъ. На внутренной сторонѣ переплета стоитъ: Presented by B. H. Hodgson Esq. Рукопись на пальмовыхъ листахъ, числомъ 52. Въ серединѣ между 25 и 26 л. и между 38 и 39 листами, есть два значительныхъ пропуска; они отмѣчены ниже въ примѣчаніяхъ къ тексту. На каждой страницѣ по пяти строкъ. На поляхъ встрѣчаются глоссы, писанныя другимъ почеркомъ; къ сожалѣнію многія изъ буквъ выцвѣли, и не всѣ слова могли быть приведены въ настоящемъ изданіи.

Рукопись заканчивается такъ:

समाप्तो ऽयं बोधिचर्यावतारः। कृतिराचार्यशान्तिदेवस्य मञ्जुघोषप्रासादादिति*) ॥

На первомъ листѣ три строчки на неварскомъ языкѣ; письмена выцвѣли и очень неясны. Подъ ними стоитъ:

1) सम्वत् ५१६ मार्गशिरशुद्धि и, повидимому, тою же рукою прибавлено: 2) बोधिचर्यावतार। दम्म ६.

Въ первой припискѣ форма буквъ отличается отъ письменъ текста рукописи.

II. L[2]. Рукопись библіотеки Лондонскаго азіатскаго общества; также на пальмовыхъ листахъ. Она описана въ каталогѣ Годжсоновскихъ буддійскихъ рукописей. См. *Catalogue of Buddhist Skr. Mss. ....by Professors E. B. Cowell and J. Eggeling*, стр. 13, № 13.

---

*) °प्रसा°?

III. M. Рукопись изъ собранія автора; вывезена изъ Непала; на непальской бумагѣ. Рукопись въ видѣ продолговатой тетрадки, 24 листика. Между 3-ьимъ и 6-мъ листомъ пропускъ, восполненный листами новой желтой бумаги, исписанными другимъ почеркомъ. На каждой страницѣ по 14 строкъ мелкаго письма.

На послѣдней страницѣ послѣ ये धर्मा и т. д. слѣдуетъ: देयधर्म्मो ऽयं प्रवरमहायानयायिन (sic) मम धर्म्मदिवाकरस्य यदत्र पुण्यं तद्भवत्वाचार्योपाध्यायमातापितृपूर्व्वङ्गमा ˉ शकलसत्वरा ˉ रनुत्तर ˉ या सम्यकसम्बोधौ फलप्राप्तये ऽस्तां ॥ कृतिरियं शान्तिदेवपादानामिति ॥ Послѣднія слова писаны другою рукою и повторены дважды.

Рукопись въ туземномъ переплетѣ изъ бумажной матеріи; на внутренной сторонѣ первой страницѣ крупнымъ почеркомъ написано:
संवत ७६१ (первая цифра не вполнѣ ясна; можно предполагать и ८) माघ कृष्ण ग्रस्तमी (!) वृहस्वतिवारश्चकूक्कु बोधिचर्य्यावतार (!) ग्रारम्भयाना. (!)

Едва ли слѣдуетъ въ этой припискѣ видѣть дату рукописи.

Въ разночтеніяхъ M. всего чаще сходится съ L². — Стихи перенумерованы издателемъ. Объ авторѣ сочиненія будетъ говорено ниже. Издатель считаетъ пріятнымъ долгомъ выразить искренную благодарность Д-ру Р. Росту, Проф. Рисъ Дэвидсу и Совѣту Лондонскаго Королевскаго Азіатскаго Общества, доставившимъ ему возможность пользоваться рукописями въ С. Петербургѣ.

---

ओँ नमो बुद्धाय[1] ॥

सुगतान्ससुतान्सधर्मकायान्प्रणिपत्यादरतो ऽखिलांश्च वन्द्यान् ।
सुगतात्मजसंवरावतारं कथयिष्यामि यथागमं समासात् ॥ १ ॥
न हि किंचिदपूर्वमत्र वाच्यं न च संग्रन्थनकौशलं ममास्ति ।
अत एव न मे परार्थचिन्ता स्वमनो भावयितुं कृतं मयेदम् ॥ २ ॥
मम तावदनेन याति वृद्धिं कुशलं भावयितुं प्रसादवेगः ।
अथ मत्समधातुरेव पश्येदपरो ऽप्येनमतो ऽपि सार्थको ऽयम् ॥ ३ ॥
क्षणसंपदियं सुदुर्लभा प्रतिलब्धा पुरुषार्थसाधनी ।
यदि नात्र विचिन्त्यते हितं पुनरप्येष समागमः कुतः ॥ ४ ॥
रात्रौ यथा मेघघनान्धकारे विद्युत्क्षणं दर्शयति प्रकाशम् ।
बुद्धानुभावेन तथा कदाचिल्लोकस्य[2] पुण्येषु मतिः[3] क्षणं स्यात् ॥ ५ ॥
तस्माच्छुभं दुर्बलमेव नित्यं बलं तु पापस्य महत्सुघोरम् ।
तज्जीयते ऽन्येन शुभेन केन संबोधिचित्तं यदि नाम न स्यात् ॥ ६ ॥
कल्पाननल्पान्प्रविचिन्तयद्भिर्दृष्टं मुनीन्द्रैर्हितमेतदेव ।
यतः सुखेनैव सुखं प्रवृद्धमुत्प्लावयत्यप्रमिताञ्जनौघान् ॥ ७ ॥
भवदुःखशतानि तर्तुकामैरपि सत्त्वव्यसनानि हर्तुकामैः ।
बहुसौख्यशतानि भोक्तुकामैर्न विमोच्यं हि सदैव बोधिचित्तम् ॥ ८ ॥
भवचारकबन्धनो वराकः सुगतानां सुत उच्यते क्षणेन ।
स नरामरलोकवन्दनीयो भवति स्मोदित एव बोधिचित्ते ॥ ९ ॥
अशुचिप्रतिमामिमां गृहीत्वा जिनरत्नप्रतिमां करोत्यनर्घाम्[4] ।
रसजातमतीववेधनीयं सुदृढं गृह्णत बोधिचित्तसंज्ञम् ॥ १० ॥

---

1) L². नमः सर्वबुद्धबोधिसत्त्वेभ्यः — M. नमो रत्नत्रयाय — 2) L¹. °चित् लो° — 3) M. मति — 4) L². °घ्याम्.

सुपरीक्षितमप्रमेयधीभिर्बहुमूल्यं जगदेकसार्थवाहैः।
गतिपत्तनविप्रवासशीलाः सुदृढं गृह्णत बोधिचित्तरत्नम्॥ ११॥
कदलीव फलं विहाय याति क्षयमन्यत्कुशलं हि सर्वमेव।
सततं फलति क्षयं न याति प्रसवत्येव तु बोधिचित्तवृक्षः॥ १२॥
कृत्वापि पापानि सुदारुणानि यदाश्रया[1]दुत्तरति क्षणेन।
[2]शूराश्रयेणेव महाभयानि नाश्रीयते तत्कथमज्ञसत्त्वैः॥ १३॥
युगान्तकालानलवन्महान्ति पापानि यन्निर्दहति क्षणेन।
[3]यस्यानुशंसानमितानुवाच मैत्रेयनाथः सुधनाय धीमान्॥ १४॥
तद्बोधिचित्तं द्विविधं विज्ञातव्यं समासतः।
बोधिप्रणिधिचित्तं च बोधिप्रस्थानमेव च॥ १५॥
गन्तुकामस्य[4] गन्तुश्च यथा[5] भेदः प्रतीयते।
[6]तथा भेदो ऽनयोर्ज्ञेयो याथासंख्येन पण्डितैः॥ १६॥
बोधिप्रणिधिचित्तस्य संसारे ऽपि फलं महत्।
न त्वविच्छिन्नपुण्यत्वं यथा प्रस्थानचेतसः॥ १७॥
यतः प्रभृत्यपर्यन्तसत्त्वधातुप्रमोक्षणे[7]।
समाददाति तच्चित्तमनिवर्त्येन चेतसा॥ १८॥
ततः प्रभृति सुप्तस्य प्रमत्तस्याप्यनेकशः।
अविच्छिन्नाः पुण्यधाराः प्रवर्तन्ते नभःसमाः[8]॥ १९॥
इदं सुबाहुपृच्छायां सोपपत्तिकमुक्तवान्।
[9]हीनाधिमुक्तिसत्त्वार्थं स्वयमेव तथागतः॥ २०॥
शिरःशूलानि सत्त्वानां नाशयामीति चिन्तयन्।
अप्रमेयेण पुण्येन गृह्यते स्म हिताशयः॥ २१॥
किमुताप्रमितं शूलमेकैकस्य जिहीर्षतः।
अप्रमेयगुणं सत्त्वमेकैकं च चिकीर्षतः॥ २२॥
कस्य मातुः पितुर्वापि हिताशंसे[10]यमीदृशी।
देवानां वा ऋषीणां वा ब्रह्मणां वा भविष्यति॥ २३॥
तेषामेव च सत्त्वानां स्वार्थे ऽप्येष मनोरथः।

---

1) L¹. यदास्र° — 2) L¹. शूरास्र° — 3) M. °नुसन्सामामितानु — 4) M. °कामश्च — 5) L¹. यदा — 6) L². तद्वद्भे° — 7) M. विमोक्षणे — 8) M. L². नभस्समाः — 9) M. हीना° — 10) L². हितासंश्रे यमीदशो.

नोत्पन्नपूर्वः स्वप्ने[1] ऽपि परार्थे संभवः कुतः ॥ २४ ॥
सत्त्वरत्नविशेषो ऽयमपूर्वो जायते कुतः ।
यत्परार्थाशयो ऽन्येषां न स्वार्थे ऽप्युपजायते ॥ २५ ॥
जगदानन्दबीजस्य जगद्दुःखौषधस्य च ।
चित्तरत्नस्य यत्पुण्यं तत्कथं हि प्रमीयताम् ॥ २६ ॥
हिताशंसनमात्रेण बुद्धपूजा विशिष्यते ।
किं पुनः सर्वसत्त्वानां सर्वसौख्यार्थमुद्यमात् ॥ २७ ॥
दुःखमेवाभिधावन्ति दुःखनिःशरणाशया[2] ।
सुखेच्छयैव संमोहात्स्वसुखं घ्नन्ति शत्रुवत् ॥ २८ ॥
यस्तेषां [3]सुखरङ्काणां पीडितानामनेकशः ।
तृप्तिं सर्वसुखैः कुर्यात्सर्वाः पीडाश्छिनत्ति च ॥ २९ ॥
नाशयत्यपि संमोहं साधुस्तेन समः [4]कुतः
कुतो वा तादृशं मित्रं पुण्यं वा तादृशं कुतः ॥ ३० ॥
कृते यः प्रतिकुर्वीत सो पितावत्प्रशस्यते ।
[5]अव्यापारितसाधुस्तु [6]बोधिसत्त्वः किमुच्यताम् ॥ ३१ ॥
[7]कतिपयजनसत्त्रदायकः कुशलकृदित्यभिपूज्यते जनैः ।
[8]क्षणमशनकमात्रदानतः सपरिभवं दिवसार्धयापनात् ॥ ३२ ॥
किमु निरवधिसत्त्वसंख्यया निरवधिकालमनुप्रयच्छतः ।
गगनजनपरिक्षयाक्षयं [9]सकलमनोरथसंप्रपूरणम् ॥ ३३ ॥
इति [10]सत्त्रपतौ जिनस्य पुत्रे कलुषं स्वे हृदये करोति यश्च[11] ।
कलुषोदयसंख्यया स कल्पान्नरकेष्वावसतीति [12]नाथ आह ॥ ३४ ॥
अथ यस्य मनः प्रसादमेति प्रसवेत्तस्य ततो ऽधिकं फलम् ।
महता हि बलेन [13]पापकं जिनपुत्रेषु शुभत्वं यत्नतः ॥ ३५ ॥
तेषां शरीराणि नमस्करोमि यत्रोदितं तद्वरचित्तरत्नम् ।
यत्रापकारो ऽपि सुखानुबन्धी [14]सुखाकरांस्तां शरणं प्रयामि ॥ ३६ ॥

बोधिचर्यावतारे [15]बोधिचित्तानुशंसः प्रथमः परिच्छेदः ॥

---

1) $L^2$, M. °न्नः पूर्वस्वप्ने — $L^2$. परार्थसं° — 2) M. $L^2$. °शयाः — 3) M. °रङ्कानां — $L^2$. °रङ्कणाणाम्पी° — 4) M. कृतः — 5) M. अव्यापरि° — 6) $L^2$. °त्वं — 7) $L^1$. °सत्र° — $L^2$. M. °शत्र° — 8) M. °स° — 9) M. शकल° — 10) $L^1$. सत्र° $L^2$. शतु° M. शत्र° — 11) $L^2$, M. — $L^1$. यः — 12) M. नाथश्चाह — 13) $L^1$. पापकर्म — 14) $L^2$. सुखाका° — 15) $L^2$. °शंसा.

तच्चित्तरत्नग्रहणाय सम्यक् पूजां करोम्येष तथागतानाम्।
सद्धर्मरत्नस्य च निर्मलस्य बुद्धात्मजानां च गुणोदधीनाम्॥ १॥
यावन्ति पुष्पाणि फलानि चैव भैषज्यजातानि च यानि सन्ति।
रत्नानि यावन्ति च सन्ति लोके जलानि च स्वच्छमनोरमाणि॥ २॥
महीधरा* रत्नमयास्तथान्ये वनप्रदेशाश्च विवेकरम्याः।
लताः सुपुष्पाभरणोज्ज्वलाश्च द्रुमाश्च ये सत्फलनम्रशाखाः॥ ३॥
देवादिलोकेषु च गन्धधूपाः कल्पद्रुमा रत्नमयाश्च वृक्षाः।
सरांसि चाम्भोरुहभूषणानि हंसस्वनात्यन्तमनोहराणि[1]॥ ४॥
अकृष्टजातानि च शस्यजातान्यन्यानि वा पूज्यविभूषणानि।
आकाशधातुप्रसरावधीनि सर्वाण्यपीमान्यपरिग्रहाणि॥ ५॥
आदाय बुद्ध्या मुनिपुंगवेभ्यो निर्यातयाम्येष सपुत्रकेभ्यः।
गृह्णन्तु तन्मे वरदक्षिणीया महाकृपा मामनुकम्पमानाः॥ ६॥
अपुण्यवानस्मि महादरिद्रः पूजार्थमन्यन्मम नास्ति किंचित्।
अतो ममार्थाय परार्थचित्ता[2] गृह्णन्तु नाथा इदमात्मशक्त्या॥ ७॥
ददामि चात्मानमहं जिनेभ्यः सर्वेण सर्वं च तदात्मजेभ्यः।
परिग्रहं मे कुरुताग्रसत्त्वाः युष्मासु दासत्वमुपैमि भक्त्या॥ ८॥
परिग्रहेणास्मि भवत्कृतेन निर्भीर्भवे[3] सत्त्वहितं करोमि।
पूर्वं च पापं समतिक्रमामि नान्यच्च पापं प्रकरोमि भूयः॥ ९॥
रत्नोज्ज्वलस्तम्भमनोरमेषु मुक्तामयोद्भासिवितानकेषु।
स्वच्छोज्ज्वलस्फाटिककुट्टिमेषु सुगन्धिषु स्नानगृहेषु तेषु॥ १०॥
मनोज्ञगन्धोदकपुष्पपूर्णैः कुम्भैर्महारत्नमयैरनेकैः।
स्नानं करोम्येष तथागतानां तदात्मजानां च सगीतवाद्यम्॥ ११॥
प्रधूपितैर्धौतमलैरतुल्यैर्वस्त्रैश्च तेषां तनुमुन्मृषामि[4]।
ततः सुरक्तानि सुधूपितानि ददामि तेभ्यो वरचीवराणि॥ १२॥
दिव्यैर्मृदुश्लक्ष्णविचित्रशोभैर्वस्त्रैरलंकारवरैश्च तैस्तैः।
[5] समन्तभद्राजितमञ्जुघोषलोकेश्वरादीनपि मण्डयामि॥ १३॥
सर्वत्रिसाहस्रविसारि[6]गन्धैर्गन्धोत्तमैस्तामनुलेपयामि।

1) L². °मनोरमाणि — 2) L². °चित्ता — 3) M. निभिर्भवे — L². निर्भेभि° — 4) M. °जामि — 5) M. °सूक्ष्म° — 6) L². °विसार°.

*) L¹. °надъ строкой: पर्वता.

[1]सूतप्तसून्मृष्टसुधौतहेमप्रभोज्ज्वलां सर्वमुनीन्द्रकायान् ॥ १४ ॥
मान्दारवेन्दीवरमल्लिकाद्यैः सर्वैः सुगन्धैः कुसुमैर्मनोज्ञैः ।
अभ्यर्चयाम्यर्च्यतमान्मुनीन्द्रां[2] स्रग्भिश्च संस्थानमनोरमाभिः ॥ १५ ॥
स्फीतस्फुरद्गन्धमनोरमैश्च तान्धूपमेघैरुपधूपयामि ।
भोज्यैश्च खाद्यैर्विविधैश्च[3] पेयैस्तेभ्यो निवेद्यं च निवेदयामि ॥ १६ ॥
रत्नप्रदीपांश्च निवेदयामि सुवर्णपद्मेषु निविष्टपङ्क्तीन् ।
गन्धोपलिप्तेषु च कुट्टिमेषु किरामि [4]पुष्पप्रकारां मनोज्ञान् ॥ १७ ॥
प्रलम्बमुक्तामणिहारशोभानाभास्वरान्दिग्मुखमण्डनांस्तान् ।
विमानमेघां स्तुतिगीतरम्यान्मैत्रीमयेभ्यो ऽपि[5] निवेदयामि ॥ १८ ॥
सुवर्णदण्डैः[6] कमनीयरूपैः[7] संसक्तमुक्तानि समुच्छ्रितानि ।
प्रधारयाम्येष महामुनीनां रत्नातपत्राण्यतिशोभनानि ॥ १९ ॥
अतः परं प्रतिष्ठन्तां पूजामेघा मनोरमाः ।
तूर्यसंगीतिमेघाश्च सर्वसत्त्वप्रहर्षणाः ॥ २० ॥
सर्वसद्धर्मरत्नेषु चैत्येषु प्रतिमासु च ।
पुष्परत्नादिवर्षाश्च[8] प्रवर्तन्तां निरन्तरम् ॥ २१ ॥
मञ्जुघोषप्रभृतयः पूजयन्ति यथा जिनान् ।
तथा तथागतान्नाथां सपुत्रान्पूजयाम्यहम् ॥ २२ ॥
स्वराङ्गसागरैः स्तोत्रैः स्तौमि चाहं गुणोदधीन् ।
स्तुतिसंगीतिमेघाश्च संभवन्त्वेषनन्यथा ॥ २३ ॥
*सर्वक्षेत्राणुसंख्यैश्च प्रणामैः प्रणमाम्यहम् ।
सर्वत्र्यध्वगतां बुद्धां सहधर्मगणोत्तमान् ॥ २४ ॥
सर्वचैत्यानि वन्देऽहं बोधिसत्त्वाश्रयांस्तथा[9] ।
नमस्करोम्युपाध्यायानभिवन्द्यान्[10]यतींस्तथा ॥ २५ ॥
बुद्धं गच्छामि शरणं यावदाबोधिमण्डतः ।
धर्मं गच्छामि शरणं बोधिसत्त्वगणं तथा ॥ २६ ॥
विज्ञापयामि संबुद्धां सर्वदिक्षु व्यवस्थितान् ।

---

1) M. सूतप्त° — L¹. सुतप्त° — 2) L². °र्च्चतमा° — 3) M. (°श्च) सपेयै° — 4) L², M. °प्रक° — 5) M. च — 6) M. कमलीय° — 7) L². सशक्त° — 8) L², M. °र्षाणि — 9) L¹, L² °स्रयां — 10) L² °ध्याय-यम°, M. °ध्यायं अभि°.

*) L¹. на полѣ यत्र २ तथागत (: ?) स्थित (: ?).

महाकारुणिकांश्चापि बोधिसत्वां कृताञ्जलिः ॥ २७ ॥
अनादिमति संसारे जन्मन्यत्रैव वा पुनः ।
यन्मया पशुना[1] पापं कृतं कारितमेव वा ॥ २८ ॥
यच्चानुमोदितं किंचिदात्मघाताय मोहतः ।
तदत्ययं देशयामि पश्चात्तापेन तापितः ॥ २९ ॥
रत्नत्रयेऽपकारो यो मातापितृषु वा मया ।
गुरुष्वन्येषु वा क्षेपात्कायवाग्बुद्धिभिः कृतः ॥ ३० ॥
अनेकदोषदुष्टेन मया पापेन नायकाः[2] ।
यत्कृतं दारुणं पापं तत्सर्वं देशयाम्यहम् ॥ ३१ ॥
कथं च निःसराम्यस्मान्नित्योद्विग्नोऽस्मि नायकाः ।
मा भून्मे मृत्युरचिरादक्षीणे पापसंचये[3] ॥ ३२ ॥
कथं च निःसराम्यस्मात्परित्रायत[4] सत्वरम् ।
मा ममाक्षीणपापस्य मरणं शीघ्रमेष्यति ॥ ३३ ॥
कृताकृतापरीक्षो[5]ऽयं मृत्युर्विश्रम्भघातकः[6] ।
स्वस्थास्वस्थैरविश्वास्य आकस्मिकमहाशनिः ॥ ३४ ॥
प्रियाप्रियनिमित्तेन पापं कृतमनेकधा ।
सर्वमुत्सृज्य गन्तव्यमिति[7] न ज्ञातमीदृशम् ॥ ३५ ॥
अप्रिया न भविष्यन्ति प्रियो मे न भविष्यति ।
अहं च न भविष्यामि सर्वं च न भविष्यति ॥ ३६ ॥
तत्तत्स्मरणतां याति यद्यद्वस्त्वनुभूयते[8] ।
स्वप्नानुभूतवत्सर्वं गतं न पुनरीक्ष्यते[9] ॥ ३७ ॥
इहैव तिष्ठतस्तावद्गता[10] नैके प्रियाप्रियाः ।
तन्निमित्तं तु यत्पापं तत्स्थितं घोरमग्रतः ॥ ३८ ॥
एवमागन्तुकोऽस्मीति न[11] मया प्रत्यवेक्षितम् ।
[12]मोहानुनयविद्वेषैः कृतं पापमनेकधा ॥ ३९ ॥
रात्रिंदिवमविश्राममायुषो वर्धते व्ययः[13] ।

---

1) M. पंशुना — 2) L². °कः — 3) 32. только въ M. — 4) L². °तु — 5) L². कृताकृत° — 6) L¹, L². °र्विस्र° — 7) M. вм. इति стоитъ मया — 8) M. °स्तु न भूयते — 9) M. °क्षते — 10) M. तिष्ठत ता° — 11) M. मया न — 12) L². तेनानु° — L¹. नाननय; на полѣ मोहा какъ въ M. — 13) L². व्ययम्.

आयस्य चागमो नास्ति न मरिष्यामि किं न्वहम् ॥ ४० ॥
इह शय्यागतेनापि बन्धुमध्येऽपि तिष्ठता ।
मयैवैकेन सोढव्या मर्मच्छेदादिवेदना ॥ ४१ ॥
यमदूतैर्गृहीतस्य कुतो बन्धुः कुतः सुहृत् ।
पुण्यमेकं तदा त्राणं मया तच्च न सेवितम् ॥ ४२ ॥
अनित्यजीवितासङ्गादिदं भयमजानता ।
प्रमत्तेन मया नाथा बहुपापमुपार्जितम् ॥ ४३ ॥ [1]
अङ्गच्छेदार्थमप्यद्य नीयमानो विशुष्यति ।
पिपासितो दीनदृष्टिरन्यदेवेक्षते जगत् ॥ ४४ ॥
किं पुनर्भैरवाकारैर्यमदूतैरधिष्ठितः ।
महात्रासज्वरग्रस्तः पुरीषोत्सर्गवेष्टितः ॥ ४५ ॥
कातरैर्दृष्टिपातैश्च त्राणान्वेषी चतुर्दिशम् ।
को मे महाभयादस्मात्साधुस्त्राणं[2] करिष्यति[3] ॥ ४६ ॥
त्राणशून्या दिशो दृष्ट्वा पुनः संमोहमागतः ।
तदाहं किं करिष्यामि तस्मिन्स्थाने महाभये[4] ॥ ४७ ॥
अद्यैव शरणं यामि जगन्नाथान्महाबलान् ।
जगद्रक्षार्थमुद्युक्तान्सर्वत्रासहरां जिनान् ॥ ४८ ॥
तैश्चाप्यधिगतं धर्मं संसारभयनाशनम् ।
शरणं यामि भावेन बोधिसत्त्वगणं तथा ॥ ४९ ॥
समन्तभद्रायात्मानं ददामि भयविह्वलः ।
पुनश्च मञ्जुघोषाय ददाम्यात्मानमात्मना ॥ ५० ॥
तं चावलोकितं नाथं कृपाव्याकुलचारिणम् ।
विरौम्यार्तरवं भीतः स मां रक्षतु पापिनम् ॥ ५१ ॥
आर्यमाकाशगर्भं च क्षितिगर्भं च भावतः ।
सर्वान्महाकृपांश्चापि त्राणान्वेषी विरौम्यहम् ॥ ५२ ॥
यं दृष्ट्वैव च संत्रस्ताः पलायन्ते चतुर्दिशम् ।
यमदूतादयो दुष्टास्तं नमस्यामि वज्रिणम् ॥ ५३ ॥
अतीत्य युष्मद्वचनं सांप्रतं भयदर्शनात् ।

- 5) L². कृताकृत° —
) M. °क्षते — 10) M.
ोक्हा какъ въ M. —

---

1) M. °दुःख° — 2) M. साधु त्राणं — 3) M. L². भविष्यति — 4) L². на полѣ поправка: °ये

शरणं यामि वो भीतो भयं नाशयत द्रुतम् ॥ ५४ ॥
इत्वरव्याधिभीतोऽपि[1] वैद्यवाक्यं न लङ्घयेत् ।
किमु व्याधिशतैर्ग्रस्तश्चतुर्भिश्चतुरुत्तरैः ॥ ५५ ॥
एकेनापि यतः सर्वे जम्बूद्वीपगता नराः ।
नश्यन्ति येषां[2] भैषज्यं सर्वादिक्षु न लभ्यते ॥ ५६ ॥
तत्र सर्वज्ञवैद्यस्य सर्वशल्यापहारिणः ।
वाक्यमुल्लङ्घयामीति धिग्मामत्यन्तमोहितम् ॥ ५७ ॥
अत्यप्रमत्तस्तिष्ठामि[3] प्रपातेष्वितरेष्वपि ।
किमु योजनसाहस्रे प्रपाते दीर्घकालिके[4] ॥ ५८ ॥
अद्यैव मरणं नैति न युक्ता मे सुखासिका[5] ।
अवश्यमेति सा वेला न भविष्याम्यहं यदा ॥ ५९ ॥
अभयं केन मे दत्तं निःसरिष्यामि[6] वा कथम् ।
अवश्यं न भविष्यामि कस्मान्मे सुस्थितं मनः ॥ ६० ॥
पूर्वानुभूतनष्टेभ्यः किं मे सारमवस्थितम् ।
येषु मेऽभिनिविष्टेन गुरूणां लङ्घितं वचः ॥ ६१ ॥
जीवलोकमिमं त्यक्त्वा बन्धून्परिचितांस्तथा ।
एकाकी क्वापि यास्यामि किं मे सर्वैः प्रियाप्रियैः ॥ ६२ ॥
इयमेव तु मे चिन्ता युक्ता रात्रिंदिवं सदा ।
अशुभान्नियतं दुःखं निःसरेयं ततः कथम् ॥ ६३ ॥
मया बालेन मूढेन यत्किंचित्पापमाचितम् ।
प्रकृत्या यच्च सावद्यं प्रज्ञप्त्यावद्यमेव च ॥ ६४ ॥
तत्सर्वं देशयाम्येष नाथानामग्रतः स्थितः ।
कृताञ्जलिर्दुःखभीतः प्रणिपत्य पुनः पुनः ॥ ६५ ॥
अत्ययमत्ययत्वेन प्रतिगृह्णन्तु नायकाः ।
अभद्रकमिदं[7] नाथा न कर्तव्यं पुनर्मया ॥ ६६ ॥

बोधिचर्यावतारे[8] पापदेशना द्वितीयः परिच्छेदः ॥

---

1) L². ०व्याधिभीत्यापि — 2) M. येषां नस्यन्ति — 3) M. तिष्ठाम्यतिप्रमत्तोऽहं — L². अप्य० — 4) M. ०लके — 5) M. सुखाशि० — 6) L². निः शरि० — 7) L². M. न भद्र० — 8) M. इति.

अपायदुःखविश्रामं सर्वसत्त्वैः कृतं[1] शुभम् ।
अनुमोदे प्रमोदेन सुखं तिष्ठन्तु दुःखिताः ॥ १ ॥
संसारदुःखनिर्मोक्षमनुमोदे शरीरिणाम् ।
बोधिसत्त्वत्वबुद्धत्वमनुमोदे च तायिनाम् ॥ २ ॥
चित्तोत्पादसमुद्रांश्च सर्वसत्त्वसुखावहान् ।
सर्वसत्त्वहिताधानाननुमोदे च शासिनाम्[2] ॥ ३ ॥

[3]पुण्यानुमोदना ॥

सर्वासु दिक्षु संबुद्धान्प्रार्थयामि कृताञ्जलिः ।
धर्मप्रदीपं कुर्वन्तु मोहाद्दुःखप्रपातिनाम् ॥ ४ ॥

अध्येषणा ॥

निर्वातुकामांश्च जिनां याचयामि कृताञ्जलिः ।
कल्पाननन्तांस्तिष्ठन्तु[4] माभूदन्धमिदं जगत् ॥ ५ ॥

याचना ॥

एवं सर्वमिदं कृत्वा यन्मया सादितं[5] शुभम् ।
तेन स्यां सर्वसत्त्वानां सर्वदुःखप्रशान्तिकृत् ॥ ६ ॥
ग्लानानामस्मि भैषज्यं भवेयं वैद्य एव च ।
तदुपस्थायकश्चैव[6] यावद्रोगापुनर्भवः ॥ ७ ॥
क्षुत्पिपासाव्यथां हन्यामन्नपानप्रवर्षणैः ।
दुर्भिक्षान्तरकल्पेषु भवेयं पानभोजनम् ॥ ८ ॥
दरिद्राणां च सत्त्वानां निधिः स्यामहमक्षयः ।
नानोपकरणाकारैरुपतिष्ठेयमग्रतः ॥ ९ ॥
आत्मभावांस्तथा भोगान्सर्वं त्र्यध्वगतं[7] शुभम् ।
निरपेक्षस्त्यजाम्येष सर्वसत्त्वार्थसिद्धये ॥ १० ॥

---

1) L². शुभं कृतं — 2) L². शाशिनां — 3) M. अनुमोदना — 4) L². M. °नल्पां° — 5) M. साधितं — 6) M. °द्रोगः पुनर्भवे — L². °गो पुनर्भवः — 7) M. L². सर्वत्र्य°.

सर्वत्यागश्च निर्वाणं निर्वाणार्थि च मे मनः।
त्यक्तव्यं चेन्मया सर्वं वरं सत्त्वेषु दीयताम्॥ ११॥
यथा सुखीकृतश्चात्मा मयायं सर्वदेहिनाम्।
घ्नन्तु निन्दन्तु वा नित्यमाकिरन्तु च पांसुभिः॥ १२॥
क्रीडन्तु मम कायेन हसन्तु विलसन्तु च।
दत्तस्तेभ्यो मया कायश्चिन्तया किं ममानया॥ १३॥
कारयन्तु च कर्माणि यानि तेषां सुखावहम्।
अनर्थः कस्यचिन्माभून्मामालम्ब्य कदाचन॥ १४॥
येषां क्रुद्धा प्रसन्ना वा मामालम्ब्य मतिर्भवेत्।
[1]स एव तेषां हेतुः स्यान्नित्यं [2]सर्वेष्टसिद्धये॥ १५॥
अभ्याख्यास्यन्ति मां ये च ये चान्येऽप्यपकारिणः।
उत्प्रासकास्तथान्ये वा सर्वे स्युर्बोधिभागिनः[3]॥ १६॥
अनाथानामहं नाथः सार्थवाहश्च यायिनाम्।
पारेप्सूनां च नौभूतः सेतुः संक्रम एव च॥ १७॥
दीपार्थिनामहं दीपः शय्या शय्यार्थिनामहम्।
दासार्थिनामहं दासो भवेयं सर्वदेहिनाम्॥ १८॥
[4]चिन्तामणिर्भद्रघटः [5]सिद्धविद्यामहौषधिः।
भवेयं कल्पवृक्षश्च कामधेनुश्च देहिनाम्॥ १९॥
पृथिव्यादीनि भूतानि निःशेषाकाशवासिनाम्।
सत्त्वानामप्रमेयाणां यथा भोगान्यनेकधा[6]॥ २०॥
एवमाकाशनिष्ठस्य [7]सत्त्वधातोरनेकधा।
भवेयमुपजीव्योऽहं यावत्सर्वे न निर्वृताः॥ २१॥
यथा गृहीतं सुगतैर्बोधिचित्तं पुरातनैः।
[8]ते बोधिसत्त्वशिक्षायामानुपूर्व्या यथा स्थिताः॥ २२॥
तद्वदुत्पादयाम्येष बोधिचित्तं जगद्धिते।
तद्वदेव च ताः शिक्षाः [9]शिक्षिष्यामि यथाक्रमम्॥ २३॥
एवं गृहीत्वा मतिमान्बोधिचित्तं प्रसादतः।

---

1) L². तेषां सएव — 2) M. L². सर्वार्थ° — 3) L¹. °धिर्भागिनः — L². सर्वेषुर्बो° — 4) L². चिन्तामणिभ° — 5) M. °महोदधिः — 6) L². °नेकशः — 7) M. सर्वधातो° — 8) L². तेषां — 9) L². शिक्षिष्येऽहं.

पुनः पृष्ठस्य पुष्ट्यर्थं चित्तमेवं प्रहर्षयेत् ॥ २४ ॥
अद्य मे सफलं जन्म सुलब्धो मानुषो भवः ।
अद्य बुद्धकुले जातो बुद्धपुत्रोऽस्मि सांप्रतम् ॥ २५ ॥
तथाधुना मया[1] कार्यं स्वकुलोचितकारिणाम्[2] ।
निर्मलस्य कुलस्यास्य कलङ्को न भवेद्यथा[3] ॥ २६ ॥
अन्धः[*] संकारकूटेभ्यो यथा रत्नमवाप्नुयात् ।
तथा कथंचिदप्येतद्बोधिचित्तं ममोदितम् ॥ २७ ॥
जगन्मृत्युविनाशाय जातमेतद्रसायनम् ।
जगद्दारिद्र्यशमनं[4] निधानमिदमक्षयम् ॥ २८ ॥
जगद्व्याधिप्रशमनं भैषज्यमिदमुत्तमम् ।
भवाध्वभ्रमणश्रान्तजगद्विश्रामपादपः ॥ २९ ॥
दुर्गत्युत्तरणे सेतुः सामान्यः सर्वयायिनाम् ।
जगत्क्लेशोष्मशमन उदितश्चित्तचन्द्रमाः ॥ ३० ॥
जगदज्ञानतिमिरप्रोत्सारणमहारविः ।
सद्धर्मक्षीरमथनान्नवनीतं समुत्थितम् ॥ ३१ ॥
सुखभोगबुभुक्षितस्य वा जनसार्थस्य भवाध्वचारिणः[5] ।
[6] सुखसत्त्रमिदं ह्युपस्थितं सकलाभ्यागतसत्त्वतर्पणम्[7] ॥ ३२ ॥
जगदद्य निमन्त्रितं मया सुगतत्वेन सुखेन चान्तरा ।
पुरतः खलु सर्वतायिनामभिनन्दन्तु सुरासुरादयः ॥ ३३ ॥

बोधिचर्यावतारे बोधिचित्तपरिग्रहो नाम तृतीयः परिच्छेदः ॥

एवं गृहीत्वा सुदृढं बोधिचित्तं जिनात्मजः ।
शिक्षानतिक्रमे यत्नं कुर्यान्नित्यमतन्द्रितः ॥ १ ॥
सहसा यत्समारब्धं सम्यग्यदविचारितम् ।
तत्र कुर्यान्न वेत्येवं प्रतिज्ञायापि युज्यते ॥ २ ॥
विचारितं तु यद्बुद्धैर्महाप्राज्ञैश्च[8] तत्सुतैः ।
मयापि च यथाशक्ति[9] तत्र किं परिलम्ब्यते ॥ ३ ॥

---

1) M. °नया — 2) M. °णा — 3) L². भवे यथा — 4) M., L². °द्यसमनं — 5) L². भवाद्य° — 6) L². सुखसर्व° — 7) M. शकला° — 8) L². °प्रज्ञैश्च — 9) M. शक्त्या.

*) L¹. на полѣ तच्च संसार - - रकूटेभ्यो मोहान्धः.

यदि चैवं प्रतिज्ञाय साधयेयं न कर्मणा ।
एतां सर्वां[1] विसंवाद्य का गतिर्मे भविष्यति ॥ ४ ॥
मनसा चिन्तयित्वापि यो न दद्यात्पुनर्नरः ।
स प्रेतो भवतीत्युक्तमल्पमात्रेऽपि वस्तुनि ॥ ५ ॥
किमुतानुत्तरं सौख्यमुच्चैरुद्घुष्य भावतः ।
जगत्सर्वं विसंवाद्य का गतिर्मे भविष्यति ॥ ६ ॥
वेत्ति सर्वज्ञ एवैतामचिन्त्यां कर्मणो गतिम् ।
यद्बोधिचित्तत्यागेऽपि मोचयत्येव तां नरान् ॥ ७ ॥
बोधिसत्त्वस्य तेनैवं[2] सर्वापत्तिर्गरीयसी ।
यस्मादापद्यमानोऽसौ सर्वसत्त्वार्थहानिकृत् ॥ ८ ॥
योऽप्यन्यः क्षणमप्यस्य पुण्यविघ्नं करिष्यति ।
तस्य दुर्गतिपर्यन्तो नास्ति सत्त्वार्थघातिनः ॥ ९ ॥
एकस्यापि हि सत्त्वस्य हितं हत्वा हतो भवेत् ।
अशेषाकाशपर्यन्तवासिनां किमु देहिनाम् ॥ १० ॥
एवमापत्तिबलतो बोधिचित्तबलेन च ।
दोलायमानः संसारे भूमिप्राप्तौ चिरायते ॥ ११ ॥
तस्माद्यथा प्रतिज्ञातं साधनीयं मयादरात् ।
नाद्य चेत्क्रियते यत्नस्[3]तलेनास्मि तलं गतः ॥ १२ ॥
अप्रमेया[4] गता बुद्धाः सर्वसत्त्वगवेषकाः ।
नैषामहं स्वदोषेण चिकित्सागोचरं गतः ॥ १३ ॥
अद्यापि चेत्तथैव स्यां[5] यथैवाहं पुनः पुनः ।
दुर्गतिव्याधिमरणच्छेदभेदाद्यवाप्नुयाम् ॥ १४ ॥
कदा तथागतोत्पादं श्रद्धां मानुष्यमेव च ।
कुशलाभ्यासयोग्यत्वमेवं[6] लप्स्ये[7]ऽतिदुर्लभम् ॥ १५ ॥
आरोग्यं[8] दिवसं चेदं सभक्तं निरुपद्रवम् ।
आयुःक्षणं[9] विसंवादि कायोयाचितकोपमः ॥ १६ ॥
न हीदृशैर्मच्चरितैर्मानुष्यं लभ्यते[10] पुनः ।

---

1) M. सत्वां — 2) M. L². °व — 3) M. यत्नः — 4) L². असंख्येया — 5) L². स्याद्यथै° — 6) M., — L². L¹. योगत्व — 7) M. लप्स्से — 8) L². आरोग्ये दि° — 9) L². M. °क्षणावि° — 10) M. लभते.

अलभ्यमाने मानुष्ये पापमेव[1] कुतः शुभम्॥ १७॥
यदा[2] कुशलयोग्योऽपि कुशलं न करोम्यहम्।
अपायदुःखैः संमूढः किं करिष्याम्यहं तदा॥ १८॥
अकुर्वतश्च कुशलं पापं चाप्युपचिन्वतः[3]।
हतः सुगतिशब्दोऽपि कल्पकोटिशतैरपि॥ १९॥
अत एवाह भगवान्मानुष्यमतिदुर्लभम्।
महार्णवयुगच्छिद्रकूर्मग्रीवार्पणोपमम्॥ २०॥
एकक्षणकृतात्पापादवीचौ कल्पमास्यते।
अनादिकालोपचितात्पापात्का सुगतौ कथा॥ २१॥
न च तन्मात्रमेवासौ वेदयित्वा विमुच्यते।
[4]यस्मात्तद्वेदयन्नेव पापमन्यत्प्रसूयते॥ २२॥
नातः परा वञ्चनास्ति न च मोहोऽस्त्यतः परः[5]।
यदीदृशं क्षणं प्राप्य नाभ्यस्तं कुशलं मया॥ २३॥
यदि चैवं[6] विमृष्यामि पुनः सीदामि मोहितः।
शोचिष्यामि चिरं भूयो यमदूतैः प्रचोदितः॥ २४॥
चिरं[7] धक्ष्यति मे कायं नारकाग्निः सुदुःसहः।
पश्चात्तापानलश्चित्तं चिरं धक्ष्यत्यशिक्षितम्॥ २५॥
कथंचिदपि संप्राप्तो हितभूमिं सुदुर्लभाम्।
जानन्नपि च नीयेऽहं तानेव नरकान्पुनः॥ २६॥
अत्र मे चेतना नास्ति मन्त्रैरिव विमोहितः।
न जाने केन[8] मुह्यामि कोऽत्रान्तर्मम तिष्ठति॥ २७॥
हस्तपादादिरहितास्तृष्णाद्वेषादिशत्रवः।
न[9] शूरा न च ते प्राज्ञाः कथं दासीकृतोऽस्मि तैः॥ २८॥
मच्चित्तावस्थिता एव घ्नन्ति मामेव सुस्थिताः।
तत्राप्यहं न कुप्यामि धिग[10]स्थानसहिष्णुताम्॥ २९॥
सर्वे देवा मनुष्याश्च यदि स्युर्मम शत्रवः।

---

1) L². °वं — 2) M. °ग्ये — 3) L². °चित्ततः — 4) M. वेदयेन्नेव — L². °यान्नेव — 5) M., L², परम् — 6) M. विमृष्यापि — 7) M. धक्ष्यन्ति — 8) M. मू° — 9) M. °राः — L¹, L². सूरा — 10) M., L². — L¹. °स्थानं स°.

तेऽपि नावीचिकं वह्निं समुद्रानयितुं क्षमाः ॥ ३० ॥
मेरोरपि यदासङ्गान्न भस्माप्युपलभ्यते ।
क्षणात्क्षिपन्ति मां तत्र बलिनः क्लेशशत्रवः ॥ ३१ ॥
न हि सर्वान्यशत्रूणां[1] दीर्घमायुरपीदृशम् ।
अनाद्यन्तं महादीर्घं यन्मम क्लेशवैरिणाम् ॥ ३२ ॥
सर्वे हिताय कल्पन्ते[2] आनुकूल्येन[3] सेविताः ।
सेव्यमानास्त्वमी[4] क्लेशाः सुतरां दुःखकारकाः ॥ ३३ ॥
इति संततदीर्घवैरिषु[5] व्यसनौघप्रसवैकहेतुषु ।
हृदये निवसत्सु[6] निर्भयं मम संसाररतिः कथं भवेत् ॥ ३४ ॥
भवचारकपालका इमे नरकादिष्वपि बध्यघातकाः ।
मतिवेश्मनि लोभपञ्जरे यदि तिष्ठन्ति कुतः सुखं[7] मम ॥ ३५ ॥
तस्मान्न तावदहमत्र धुरं क्षिपामि यावन्न शत्रव इमे निहताः समक्षम्[8] ।
स्वल्पेऽपि तावदपकारिणि बद्धरोषा मानोन्नतास्तमनिहत्य न यान्ति निद्राम् ॥ ३६ ॥
प्रकृतिमरणदुःखितान्धकारान्[9] रणशिरसि[10] प्रसभं[11] निहन्तुमुग्राः ।
अगणितशरशक्तिघातदुःखा न विमुखतामुपयान्त्यसाधयित्वा[12] ॥ ३७ ॥
किमुत सततसर्वदुःखहेतून्प्रकृतिरिपूनुपहन्तुमुद्यतस्य ।
भवति मम विषाददैन्यमद्य[13] व्यसनशतैरपि केन हेतुना वै ॥ ३८ ॥
अकारणेनैव रिपुक्षतानि[14] गात्रेष्वलंकारवदुद्वहन्ति ।
महार्थसिद्धौ तु समुद्यतस्य दुःखानि कस्मान्मम बाधकानि ॥ ३९ ॥
स्वजीविकामात्रनिबद्धचित्ताः कैवर्तचण्डालकृषीवलाद्याः[15] ।
शीतातपादिव्यसनं सहन्ते जगद्धितार्थं न कथं सहेऽहम्[16] ॥ ४० ॥
दशदिग्व्योमपर्यन्तजगत्क्लेशविमोक्षणे ।
प्रतिज्ञाय मदात्मापि[17] न क्लेशेभ्यो विमोचितः ॥ ४१ ॥

---

1) M. L¹. सर्वाण्य° — 2) M. L². °ल्प्यन्ते — 3) L². आनुकूलेन — 4) M. सेव्यमानाप्यमी — L². सुतरा; анусвāра стерта. — 5) M. L². संतति° — 6) L². निवत्सु — 7) M. शुभं — 8) L¹. सम्यक्षम् — L². निहिताः — 9) M. °न्धराकान्त्र° — L². (°न्ध)स्वराकारण° — न्ध зачеркнуто. — 10) L². M., — L¹ रणं — 11) L². प्रभवं — 12) M. °मुखतां यान्त्य° — 13) L¹. विशाद° — 14) L². रिपुः — 15) M. °चाण्डाल° — L¹. °ण्डालव कृ° — 16) सहेयं — 17) M. L². यदात्मा°.

आत्मप्रमाणमज्ञात्वा ब्रुवन्नुन्मत्तकस्तदा ।
अनिवर्ती भविष्यामि तस्मात्क्लेशबधे[1] सदा ॥ ४२ ॥
[2]अत्र गृद्धो भविष्यामि बद्धवैरश्च विग्रही ।
[3]अन्यत्र तद्विधात्क्लेशात्क्लेशघातानुबन्धिनः ॥ ४३ ॥
गलन्त्वन्त्राणि मे कामं[4] शिरः पततु नाम मे ।
न त्वेवावनतिं यामि सर्वथा क्लेशवैरिणाम् ॥ ४४ ॥
निर्वासितस्यापि तु[5] नाम शत्रोर्देशान्तरे स्थानपरिग्रहः स्यात् ।
यतः पुनः संभृतशक्तिरेति न क्लेशशत्रोर्गतिरीदृशी तु ॥ ४५ ॥
क्वासौ यायान्मन्मनःस्थो[6] निरस्तः स्थित्वा यस्मिन्मद्वधार्थं यतेत[7] ।
नोद्योगो मे केवलं मन्दबुद्धेः क्लेशाः प्रज्ञादृष्टिसाध्या वराकाः ॥ ४६ ॥
न क्लेशा विषयेषु नेन्द्रियगणे[8] नाप्यन्तराले स्थिता
नातोऽन्यत्र कुह स्थिताः[9] पुनरिमे मथ्नन्ति कृत्स्नं जगत् ।
मायैवेयमतो[10] विमुञ्च[11] हृदयत्रासं भजस्वोद्यमं
प्रज्ञार्थं किमकाण्ड एव नरकेष्वात्मानमाबाधसे ॥ ४७ ॥
एवं विनिश्चित्य करोमि यत्नं[12] यथोक्तशिक्षाप्रतिपत्तिहेतोः ।
वैद्योपदेशाच्चलतः कुतोऽस्ति भैषज्यसाध्यस्य निरामयत्वम् ॥ ४८ ॥

बोधिचर्यावतारे बोधिचित्ताप्रमादो नाम चतुर्थः परिच्छेदः ॥

शिक्षां रक्षितुकामेन चित्तं[13] रक्ष्यं प्रयत्नतः ।
न शिक्षा रक्षितुं[14] शक्या चलं चित्तमरक्षता ॥ १ ॥
अदान्ता मत्तमातङ्गा न कुर्वन्तीह[15] तां व्यथाम् ।
करोति यामवीच्यादौ[16] मुक्तश्चित्तमतङ्गजः ॥ २ ॥
बद्धश्चेच्चित्तमातङ्गः[17] स्मृतिरज्ज्वा समन्ततः ।
भयमस्तंगतं सर्वं कृत्स्नं कल्याणमागतम् ॥ ३ ॥
व्याघ्राः सिंहा गजा ऋक्षाः सर्पाः सर्वे च[18] शत्रवः ।
सर्वे नरकपालाश्च डाकिन्यो राक्षसास्तथा ॥ ४ ॥

---

1) L². °शाबधे — 2) L¹. M. — L². अनु° — 3) L². अन्यत् — 4) M. कायशिरः — L². कायं — 5) L². M. हि — 6) M. L¹. स्तो — L². °नस्थो — 7) L². यतेत् — 8) L². °न्द्रियं — 9) M. पुनरमी — 10) L¹. मायैवेमतो — 11) M. ऽधिमुञ्च — 12) L¹. मत्नं — 13) M. रक्ष्या — 14) L². शक्त्या — 15) M. कुर्वन्ति ह — L². व्यथा — 16) L². मुक्तचित्तमतङ्गगः — 17) L². °मात्तङ्गः — 18) L². ऽपि.

सर्वे बद्धा भवन्त्येते चित्तस्यैकस्य बन्धनात्।
चित्तस्यैकस्य दमनात्सर्वे दान्ता भवन्ति[1] च ॥ ५ ॥
यस्माद्भयानि सर्वाणि दुःखान्यप्रमितानि च।
चित्तादेव भवन्तीति कथितं तत्त्ववादिना[2] ॥ ६ ॥
शस्त्राणि केन नरके घटितानि प्रयत्नतः।
तप्तायः कुट्टिमं केन कुतो जाताश्च ताः[3] स्त्रियः ॥ ७ ॥
पापचित्तसमुद्भूतं तत्तु[4] सर्वं जगौ मुनिः।
तस्मान्न कश्चित्त्रैलोक्ये चित्तादन्यो भयानकः ॥ ८ ॥
अदरिद्रं जगत्कृत्वा दानपारमिता यदि।
जगद्दरिद्रमद्यापि सा कथं पूर्वतायिनाम् ॥ ९ ॥
फलेन[5] सह सर्वस्वं त्यागचित्तं[6] जनेऽखिले।
दानपारमिता प्रोक्ता तस्मात्सा चित्तमेव तु ॥ १० ॥
मत्स्यादयः क्व नीयन्तां मारयेयं यतो न तान्।
लब्धे विरतिचित्ते तु शीलपारमिता मता ॥ ११ ॥
कियतो मारयिष्यामि दुर्जनां गगनोपमान्।
मारिते क्रोधचित्ते तु मारिताः सर्वशत्रवः ॥ १२ ॥
भूमिं छादयितुं सर्वां कुतश्चर्म भविष्यति।
उपानच्चर्ममात्रेण[7] छन्ना भवति मेदिनी ॥ १३ ॥
बाह्यभावा मया तद्वच्छक्या[8] वारयितुं न हि।
स्वचित्तं वारयिष्यामि किं ममान्यैर्निवारितैः ॥ १४ ॥
सहापि वाक्छरीराभ्यां[9] मन्दवृत्तेर्न तत्फलम्।
यत्पटोरेककस्यापि चित्तस्य ब्रह्मतादिकम् ॥ १५ ॥
जपास्तपांसि सर्वाणि दीर्घकालकृतान्यपि।
अन्यचित्तेन मन्देन वृथैवेत्याह सर्ववित् ॥ १६ ॥
दुःखं हन्तुं सुखं प्राप्तुं ते भ्रमन्ति[10] अधाम्बरे।
यैरेतद्धर्मसर्वस्वं चित्तगुह्यं न भावितम् ॥ १७ ॥
तस्मात्स्वधिष्ठितं चित्तं मया कार्यं सुरक्षितम्।

---

1) L². भ्रमन्ति हि — 2) L². °नां — 3) L¹. ता — 4) L². M. तत्तत्सर्वं — 5) L¹. हलन — 6) L¹. °चित्तं поправлено вм. चित्ता — L². M. सर्वस्वत्यागचित्ताज्ञ° — 7) L¹. उपानद् च° — 8) L¹. तद्वत् श°, M. तावत् श° — 9) M. वाक्श°, L². °मन्दवृतेन — 10) L¹. — M. L². सुधाम्बरे.

चित्तरक्षाव्रतं मुक्त्वा बहुभिः किं मम व्रतैः ॥ १८ ॥
यथा चपलमध्यस्थो रक्षति व्रणमादरात् ।
एवं दुर्जनमध्यस्थो रक्षेच्चित्तव्रणं सदा ॥ १९ ॥
व्रणदुःखलवाद्भीतो रक्षामि व्रणमादरात् ।
संघातपर्वताघाताद्भीतश्चित्तव्रणं न किं ॥ २० ॥
अनेन हि विहारेण विहरन्दुर्जनेष्वपि ।
प्रमदाजनमध्येऽपि यतिर्धीरो न खण्ड्यते ॥ २१ ॥
लाभा नश्यन्तु मे कामं[1] सत्कारः[2] कायजीवितम् ।
नश्यत्वन्यच्च कुशलं मा[3] तच्चित्तं कदाचन ॥ २२ ॥
चित्तं[4] रक्षितुकामानां मयैष क्रियतेऽञ्जलिः ।
स्मृतिं च संप्रजन्यं च सर्वं यत्नेन रक्षत[5] ॥ २३ ॥
व्याध्याकुलो नरो यद्वन्[6] क्षमः सर्वकर्मसु ।
तथाभ्यां[7] व्याकुलं चित्तं न क्षमं[8] सर्वकर्मसु ॥ २४ ॥
असंप्रजन्यचित्तस्य[9] श्रुतचिन्तितभावितम् ।
सच्छिद्रकुम्भजलवन्न स्मृताववतिष्ठते ॥ २५ ॥
अनेके[10] श्रुतवन्तोऽपि श्राद्धा यत्नपरा अपि ।
असंप्रजन्यदोषेण भवन्त्यापत्तिकश्मलाः[11] ॥ २६ ॥
असंप्रजन्यचौरेण स्मृतिमोषानुसारिणा ।
उपचित्यापि पुण्यानि मुषिता यान्ति दुर्गतिम् ॥ २७ ॥
क्लेशतस्करसंघोऽयमवतारगवेषकः ।
प्राप्यावतारं मुष्णाति हन्ति सद्गतिजीवितम् ॥ २८ ॥
तस्मात्स्मृतिर्मनोद्वारान्नापनेया कदाचन ।
गतापि प्रत्युपस्थाप्या संस्मृत्यापायिकीं व्यथाम् ॥ २९ ॥
उपाध्यायानुशासिन्या[12] भीत्याप्यादरकारिणाम् ।
धन्यानां गुरुसंवासात्सुकरं जायते स्मृतिः ॥ ३० ॥
बुद्धाश्च बोधिसत्त्वाश्च सर्वत्राव्याहतेक्षणाः ।
सर्वमेवाग्रतस्तेषां तेषामस्मि पुरःस्थितः ॥ ३१ ॥

---

1) L¹. कायं — 2) L². M. सत्कारका° — 3) L², M. मा तु — 4) L². रक्षन्तु का° — 5) M. रक्षतः — 6) M. याव° — 7) M. нѣтъ *c*, *d* — 8) L¹. क्षमः — 9) L². श्रुतचिन्तिं° — 10) M. °न्ते — 11) M. °नाः — 12) L¹. °सासिन्या — M. °शासन्या.

इति ध्यात्वा तथा तिष्ठेत्त्रपादरभयान्वितः ।
बुद्धानुस्मृतिरप्येवं भवेत्तस्य मुहुर्मुहुः ॥ ३२ ॥
संप्रजन्यं तदायाति न च यात्यागतं पुनः ।
स्मृतिर्यदा मनोद्वारे रक्षार्थमवतिष्ठते ॥ ३३ ॥
पूर्वं तावदिदं चित्तं सदोपस्थाप्यमीदृशम् ।
निरिन्द्रियेणेव मया स्थातव्यं काष्ठवत्सदा ॥ ३४ ॥
निष्फला नेत्रविक्षेपा न कर्तव्याः कदाचन ।
निध्यायतीव[1] सततं कार्या दृष्टिरधोगता ॥ ३५ ॥
दृष्टिविश्रामहेतोस्तु दिशः पश्येत्कदाचन ।
आभासमात्रं दृष्ट्वा च स्वागतार्थं विलोकयेत् ॥ ३६ ॥
मार्गादौ भयबोधार्थं मुहुः पश्येच्चतुर्दिशम् ।
दिशो ऽपश्रम्य[2] वीक्षते[3] परावृत्यैव[4] पृष्ठतः ॥ ३७ ॥
सचेदपसरेद्वापि पुरः पश्चान्निरूप्य च ।
एवं सर्वास्ववस्थासु कार्यं बुद्ध्वा[5] समाचरेत् ॥ ३८ ॥
कायेनैवमवस्थेयमित्याक्षिप्य क्रियां पुनः ।
कथं कायः स्थित इति द्रष्टव्यः[6] पुनरन्तरा ॥ ३९ ॥
निरूप्य सर्वयत्नेन चित्तमत्तद्विपस्तथा ।
धर्मचिन्तामहास्तम्भे[7] यथा बद्धो न मुच्यते ॥ ४० ॥
कुत्र[8] मे वर्तत इति प्रत्यवेक्ष्य[9] तथा मनः ।
समाधानधुरं नैव क्षणमप्युत्सृजेद्यथा ॥ ४१ ॥
भयोत्सवादिसंबन्धे[10] यद्यशक्तो यथा सुखम् ।
दानकाले तु शीलस्य यस्मादुक्तमुपेक्षणम् ॥ ४२ ॥
यद्बुद्ध्वा कर्तुमारब्धं ततो ऽन्यं न विचिन्तयेत् ।
तदेव तावन्निष्पाद्यं तद्गतेनान्तरात्मना ॥ ४३ ॥
एवं हि सुकृतं सर्वमन्यथा नो भयं भवेत् ।
असंप्रजन्यक्लेशो ऽपि वृद्धिं चैवं गमिष्यति ॥ ४४ ॥
नानाविधप्रलापेषु वर्तमानेष्वनेकधा ।

---

1) M. °क्षीव; L². °क्षीव — 2) L². विश्रम्य, M. विश्राम्य — 3) L². °क्ष्येत, M. °क्षेच्च — 4) M. परावृत्तीव — 5) L². बुधा — 6) M. °व्यं — 7) L². °चित्ता — 8) L². कुत — 9) M. °क्ष्यस्तथा, L². °क्ष्यतथा — 10) M. भवो°.

कौतूहलेषु सर्वेषु कन्यादौत्सुक्यमागतम् ॥ ४५ ॥

मृन्मर्दनतृणच्छेदरेखाद्यफलमागतम् ।
स्मृत्वा[1] ताथागतीं शिक्षां तत्क्षणाद्भीत उत्सृजेत्[2] ॥ ४६ ॥

यदा चलितुकामः स्याद्वक्तुकामोऽपि वा भवेत् ।
स्वचित्तं प्रत्यवेक्ष्यादौ[3] कुर्याद्धैर्येण[4] युक्तिमत् ॥ ४७ ॥

अनुनीतं प्रतिहतं यदा पश्येत्स्वकं मनः ।
न कर्तव्यं न वक्तव्यं स्थातव्यं काष्ठवत्तदा ॥ ४८ ॥

उद्धतं सोपहासं वा यदा मानमदान्वितं[5] ।
सोत्प्रासातिशयं वक्रं वञ्चकं च मनो भवेत् ॥ ४९ ॥

यदात्मोत्कर्षणाभासं परपंसनमेव च[6] ।
साधिक्षेप[7] ससंरम्भं स्थातव्यं काष्ठवत्तदा ॥ ५० ॥

लाभसत्कारकीर्त्यर्थि परिवारार्थि वा पुनः ।
उपस्थानार्थि मे चित्तं तस्मात्तिष्ठामि काष्ठवत् ॥ ५१ ॥

परार्थरूक्षं[8] स्वार्थार्थि[9] परिषत्काममेव वा ।
वर्तुमिच्छति[10] मे चित्तं तस्मात्तिष्ठामि काष्ठवत् ॥ ५२ ॥

असहिष्णुलसंभीतं[11] प्रागल्भं मुखरं तथा ।
स्वपक्षाभिनिविष्टं[12] च तस्मात्तिष्ठामि काष्ठवत् ॥ ५३ ॥

एवं संक्लिष्टमालोक्य निष्फलारम्भि वा मनः ।
निगृह्णीयाद्दृढं[13] शूरः प्रतिपक्षेण तत्सदा ॥ ५४ ॥

सुनिश्चितं सुप्रसन्नं धीरं सादरगौरवम् ।
सलज्जं सभयं शान्तं पराराधनतत्परम् ॥ ५५ ॥

परस्परविरुद्धाभिर्बालेच्छाभिरखेदितम् ।
क्लेशोत्पादादिदं[14] ह्येतदेषामिति दयान्वितम् ॥ ५६ ॥

आत्मसत्त्ववशं नित्यमनवद्येषु वस्तुषु ।
निर्माणमिव निर्माणं धारयाम्येष मानसम् ॥ ५७ ॥

चिरात्प्राप्तं क्षणवरं स्मृत्वा स्मृत्वा मुहुर्मुहुः ।
धारयामीदृशं चित्तमप्रकम्प्यं सुमेरुवत् ॥ ५८ ॥

---

1) L¹. поправка вм. स्मृत्या, L². तथा° — 2) L². भीतस्तत्क्षणमुत्सृ°, M. भीतमु° — 3) M. °क्षादौ — 4) M. °मान् — 5) M. °न्वितः — 6) M. वा — 7) L¹. °पेक्षं — 8) L². °रूक्षां — 9) L². पर्षत्काम°, M. पर्षन्मे का° — 10) L². कर्तु°, M. वक्तु° — 11) M. असहिष्णुवल° — 12) M. °मिष्ठं — 13) L². M. सूरः — 14) M. ह्येवमे° — L². ह्यत्रेद°.

गृध्रैरामिषसंगृद्धैः[1] कृष्यमाणा[2] इतस्ततः।
न करोत्यन्यथा कायः कस्मादत्र[3] प्रतिक्रियाम् ॥ ५९ ॥
रक्षसीमं मनः कस्मादात्मीकृत्य समुच्छ्रयम्।
त्वत्तश्चेत्[4]पृथगेवायं तेनात्र तव को व्ययः ॥ ६० ॥
न स्वीकरोषि हे मूढ काष्ठपुत्तलिकं[5] शुचिम्।
अमेध्यघटितं यन्त्रं कस्माद्रक्षसि पूतिकम् ॥ ६१ ॥
इमं चर्मपुटं तावत्स्वबुद्ध्यैव पृथक् कुरु।
अस्थिपञ्जरतो मांसं प्रज्ञाशस्त्रेण मोचय ॥ ६२ ॥
अस्थीन्यपि पृथक् कृत्वा पश्य मज्जानमन्ततः।
किमत्र सारमस्तीति स्वयमेव विचारय ॥ ६३ ॥
एवमन्विष्य यत्नेन न दृष्टं सारमत्र ते।
अधुना वद कस्मात्त्वं कायमद्यापि रक्षसि ॥ ६४ ॥
न खादितव्यमशुचिं त्वया पेयं न शोणितम्।
नान्त्राणि चूषितव्यानि किं कायेन करिष्यसि ॥ ६५ ॥
युक्तं[6] गृध्रशृगालादेराहारार्थं तु रक्षितम्[7]।
कर्मोपकरणात्वे[8] तन्मनुष्याणां शरीरकम् ॥ ६६ ॥
एवं ते रक्षतश्चापि मृत्युराच्छिद्य निर्दयः।
कायं दास्यति गृध्रेभ्यस्तदा त्वं किं करिष्यसि ॥ ६७ ॥
न स्थास्यतीति भृत्याय न वस्त्रादि प्रदीयते।
कायो यास्यति खादित्वा कस्मात्त्वं कुरुषे व्ययम् ॥ ६८ ॥
दत्वास्मै[9] वेतनं तस्मात्स्वार्थं कुरु मनोऽधुना।
न हि वैतनिकोपात्तं सर्वं तस्मै प्रदीयते ॥ ६९ ॥
काये नौबुद्धिमाधाय गत्यागमननिश्रयात्।
यथाकामंगमं कायं कुरु सत्त्वार्थसिद्धये ॥ ७० ॥
एवंवशीकृतस्वात्मा[10] नित्यं स्मितमुखो भवेत्।
त्यजेद्भृकुटिसंकोचं[11] पूर्वाभाषी जगत्सुहृत् ॥ ७१ ॥
स शब्दपातं सहसा न पीठादीन्विनिक्षिपेत्।

---

1) M. गृधैर° — 2) M. कृषमाणा — 3) L². कस्मादद्य — 4) M. त्वतश्चे° — 5) L². M. °लकं — 6) M. मुक्तं — 7) M. L². °तुम् — 8) L². M. °रणं त्वेत° — 9) M. स्म — 10) L². M. वशीकृतश्चात्मा — 11) M. पूर्वाभासी.

नास्फालयेत्कपाटं[1] च स्यान्निःशब्दरुचिः सदा ॥ ७२ ॥
बको[2] बिडालश्चौरश्च निःशब्दो निभृतश्चरन्[3] ।
प्राप्नोत्यभिमतं कार्यमेवं नित्यं यतिश्चरेत् ॥ ७३ ॥
परचोदनदक्षाणामनधीष्टोपकारिणाम् ।
प्रतीच्छेच्छिरसा वाक्यं सर्वशिष्यः सदा भवेत् ॥ ७४ ॥
सुभाषितेषु सर्वेषु साधुकारमुदीरयेत् ।
पुण्यकारिणमालोक्य स्तुतिभिः संप्रहर्षयेत् ॥ ७५ ॥
परोक्तं च[4] गुणं ब्रूयादनुब्रूयाच्च तोषतः ।
स्ववर्णे भाष्यमाणे[5] च भावयेत्तद्गुणज्ञतां ॥ ७६ ॥
सर्वारम्भा हि[6] तुष्ट्यर्था सा वित्तैरपि दुर्लभा[7] ।
भोक्ष्यतुष्टिसुखं[8] तस्मात्परश्रमकृतैर्गुणैः ॥ ७७ ॥
न चात्र मे व्ययः कश्चित्परत्र च महत्सुखम् ।
अप्रीतिदुःखं द्वेषैस्तु महद्दुःखं परत्र च ॥ ७८ ॥
विश्वस्तविन्यस्तपदं विस्पष्टार्थं मनोरमम् ।
श्रुतिसौख्यं कृपामूलं मृदुमन्दस्वरं वदेत् ॥ ७९ ॥
ऋजु[9] पश्येत्सदा सत्त्वांश्चक्षुषा संपिबन्निव ।
[10]एतानेव समाश्रित्य बुद्धत्वं मे भविष्यति ॥ ८० ॥
सातत्याभिनिवेशोत्थं प्रतिपक्षार्थमेव[11] च ।
गुणोपकारिक्षेत्रे च दुःखिते[12] च महच्छुभम् ॥ ८१ ॥
दक्ष उत्थानसंपन्नः स्वयंकारी सदा भवेत् ।
[13]नावकाशः प्रदातव्यः कस्यचित्सर्वकर्मसु ॥ ८२ ॥
[14]उत्तरोत्तरतः श्रेष्ठा दानपारमितादयः ।
[15]नेतरार्थं त्यजेच्छ्रेष्ठामन्यत्राचारसेतुतः ॥ ८३ ॥
एवं बुद्ध्वा परार्थेषु भवेत्सततमुत्थितः ।
निषिद्धमप्यनुज्ञातं[16] कृपालोरर्थदर्शिनः ॥ ८४ ॥
[17]विनिपातगतानाथव्रतस्थान्संविभज्य[18] च ।

---

1) M. न स्फा° — 2) M. बिडलचो° — 3) M. L². — L¹. निर्भृत° — 4) M. L². गुणान्ब्रु° — 5) M. भाष° — 6) L¹. M. °र्थाः — 7) M. °भाः — 8) M. भोक्ते, L². भोक्ष्ये — 9) L². ऋजुः — 10) M. यस्मादेतान् — 11) M. वा — 12) L². दुःखितेषु — 13) M. °शं — 14) L¹. उत्तरोत्तरः — 15) L². °र्थां — 16) L². °ज्ञातुं — 17) M. °तानाथान् — 18) M. स विभ°.

भुञ्जीत मध्यमां मात्रां त्रिचीवरबहिस्त्यजेत् ॥ ८५ ॥
सद्धर्मसेवकं कायम्[1]इतरार्थे न पीडयेत् ।
एवमेव हि सत्त्वानामाशामाशु प्रपूरयेत् ॥ ८६ ॥
त्यजेन्न जीवितं तस्मादशुद्धे करुणाशये ।
तुल्याशये तु तत्त्याज्यमित्थं न परिहीयते ॥ ८७ ॥
धर्मं निर्गौरवे[2] स्वस्थे न शिरोवेष्टिते वदेत् ।
सच्छत्रदण्डशस्त्रे च नावगुण्ठितमस्तके ॥ ८८ ॥
[*]गम्भीरोदारमल्पेषु[**] न स्त्रीषु पुरुषं विना ।
हीनोत्कृष्टेषु धर्मेषु समं गौरवमाचरेत् ॥ ८९ ॥
नोदारधर्मपात्रं च हीने धर्मे नियोजयेत् ।
न चाचारं परित्यज्य[3] सूत्रमन्त्रैः प्रलोभयेत् ॥ ९० ॥
दन्तकाष्ठस्य खेटस्य विसर्जनमपावृतम् ।
नेष्टं जले स्थले भोग्ये मूत्रादेश्चापि गर्हितम् ॥ ९१ ॥
मुखपूरं न भुञ्जीत सशब्दं प्रसृतानन[4]म् ।
प्रलम्बपादं नासीत[5] न बाहू[6] मर्दयेत्समम् ॥ ९२ ॥
नैकयान्यस्त्रिया[7] कुर्याद्यानं शयन[8]मासनम् ।
लोकाप्रसादकं सर्वं दृष्ट्वा पृष्ट्वा[9] च वर्जयेत् ॥ ९३ ॥
नाङ्गुल्या कारयेत्किंचिद्दक्षिणेन तु सादरम् ।
समस्तेनैव हस्तेन मार्गमप्येवमादिशेत् ॥ ९४ ॥
न बाहूत्क्षेपकं कंचिच्छ[10]ब्दयेदल्पसंभ्रमे ।
अच्छटादि तु कर्तव्यमन्यथा स्यादसंवृतः ॥ ९५ ॥
नाथनिर्वाणशय्यावच्छयीतेप्सितया[11] दिशा ।
संप्रजानँल्लघूत्थानः प्रागवश्यं नियोगतः ॥ ९६ ॥
आचारो बोधिसत्त्वानामप्रमेय[12]उदाहृतः ।
चित्तशोधनमाचारं नियतं तावदाचरेत् ॥ ९७ ॥
रात्रिंदिवं च [13]त्रिस्कन्धं [14]त्रिष्कालं च प्रवर्तयेत् ।

---

1) M. कायं उतरार्थं — 2) M. न गौ° — 3) M. °त्याज्य — 4) L¹. प्रशृता° — 5) M. नाश्नीत — 6) M. बाङ्क — L¹. °हून् и न् вытерто. — 7) M. °यान्ये — 8) M. सयन° — L². °य्यानश° — 9) M. दृष्ट्वा, L². विवर्जयेत् — 10) M. किं — 11) L¹. °प्सिता — 12) L². M. °मेयमु° — 13) M. त्रिःस्कन्धं — L². त्रिष्कन्ध — 14) L². त्रिःका°.

*) L¹. на полѣ: धर्मं — **) L¹. на полѣ: सत्वेषु.

[1] शेषापत्तिसमस्तेन बोधिचित्तजिनाश्रयात् ॥ ९८ ॥
[2] या अवस्थाः प्रपद्येत स्वयं[3] परवशोऽपि वा ।
तास्ववस्थासु याः शिक्षाः शिक्षेत्ता एव यत्नतः ॥ ९९ ॥
न हि तद्विद्यते किंचिद्यन्न शिक्ष्यं[4] जिनात्मजैः ।
न तदस्ति न यत्पुण्यमेवं विहरतः सतः ॥ १०० ॥
पारंपर्येण साक्षाद्वा सत्त्वार्थं[5] नान्यदाचरेत् ।
सत्त्वानामेव चार्थाय सर्वं बोधाय नामयेत् ॥ १०१ ॥
सदा कल्याणमित्रं च जीवितार्थेऽपि न त्यजेत् ।
बोधिसत्त्वव्रतधरं महायानार्थकोविदम्[6] ॥ १०२ ॥
श्रीसंभवविमोक्षाच्च शिक्षेद्यद्गुरुवर्तनम् ।
एतच्चान्यच्च बुद्धोक्तं ज्ञेयं सूत्रान्तवाचनात् ॥ १०३ ॥
शिक्षाः सूत्रेषु दृश्यन्ते तस्मात्सूत्राणि वाचयेत् ।
आकाशगर्भसूत्रे[7] च मूलापत्तीर्निरूपयेत्[8] ॥ १०४ ॥
शिक्षासमुच्चयोऽवश्यं द्रष्टव्यस्तु[9] पुनः पुनः ।
विस्तरेण सदाचारो[10] यस्मात्तत्र प्रदर्शितः ॥ १०५ ॥
संक्षेपेणाथ वा तावत्पश्येत्सूत्रसमुच्चयम् ।
आर्यनागार्जुनाबद्धं द्वितीयं च प्रयत्नतः ॥ १०६ ॥
यतो[11] निर्धार्यते यत्र यदेव च नियुज्यते ।
तल्लोकचित्तरक्षार्थं शिक्षां दृष्ट्वा समाचरेत् ॥ १०७ ॥
एतदेव समासेन संप्रजन्यस्य लक्षणम् ।
यत्कायचित्तावस्थायाः[12] प्रत्यवेक्षा मुहुर्मुहुः ॥ १०८ ॥
कायेनैव पठिष्यामि वाक्पठेन[13] तु किं भवेत् ।
चिकित्सापाठमात्रेण रोगिणः किं भविष्यति ॥ १०९ ॥

बोधिचर्यावतारे संप्रजन्यरक्षणः पञ्चमः परिच्छेदः[14] ॥

---

1) M. °त्तिः — 2) M. यामवस्था — L². प्रपद्येत् — 3) M. यद्देशो — 4) M. शिक्षं — L². शिक्ष्यां — 5) M. °र्थी — L². °र्थान्ना°' — 6) M. °दः — 7) M. °त्रेषु — 8) M. °पत्ति — L². °पत्ती नि°— 9) M. °व्यश्च — 10) M. यस्मादत्र — 11) L². M. निवार्यते — 12) M. °नाः — 13) M. च — 14) M. еще: शीलपारमिता.



— 5) M. नाम्नीत —
°ध्यानश° — 9) M.
13) M. त्रिःस्कन्धं —

सर्वमेतत्सुचरितं दानं सुगतपूजनम् ।
कृतं कर्म[1]सहस्रैर्यत्प्रतिघः प्रतिहन्ति तत् ॥ १ ॥
न च द्वेषसमं पापं न च क्षान्तिसमं तपः ।
तस्मात्क्षान्तिं प्रयत्नेन भावयेद्विविधैर्नयैः ॥ २ ॥
मनःशमं न गृह्णाति न प्रीतिसुखमश्नुते[2] ।
न निद्रां न धृतिं याति द्वेषशल्ये हृदि स्थिते ॥ ३ ॥
पूजयत्यर्थमानैर्यान्येऽपि चैनं[3] समाश्रिताः[*] ।
तेऽप्येनं हन्तुमिच्छन्ति स्वामिनं द्वेषदुर्भगम् ॥ ४ ॥
सुहृदोऽप्युद्विजन्तेऽस्माद्ददाति न च सेव्यते[4] ।
संक्षेपान्नास्ति[5] तत्किंचित्क्रोधनो येन[6] सुस्थितः ॥ ५ ॥
एवमादीनि दुःखानि करोतीत्यरिसंज्ञया[7] ।
यः क्रोधं हन्ति निर्बन्धात्स सुखीह परत्र च ॥ ६ ॥
अनिष्टकरणाज्जातमिष्टस्य च विघातनात् ।
दौर्मनस्याशनं[8] प्राप्य द्वेषो दृप्तो निहन्ति माम् ॥ ७ ॥
तस्माद्विघातयिष्यामि तस्याशनमहं रिपोः ।
यस्मान्न मद्वधादन्यत्कृत्यमस्यास्ति वैरिणः ॥ ८ ॥
अत्यनिष्टागमेनापि न क्षोभ्या मुदिता मया ।
[9]दौर्मनस्येन नास्तीष्टं कुशलं त्ववहीयते ॥ ९ ॥
यद्यस्त्येव प्रतीकारो दौर्मनस्येन तत्र किम् ।
अथ नास्ति प्रतीकारो दौर्मनस्येन तत्र किम् ॥ १० ॥
दुःखं न्यक्कारपारुष्यमयशश्चेत्यनीप्सितम् ।
प्रियाणामात्मनो वापि शत्रोश्चैतद्विपर्ययात् ॥ ११ ॥
कथंचिल्लभ्यते सौख्यं दुःखं स्थितमयत्नतः[10] ।
दुःखेनैव च निःसारश्चेतस्तस्माद्दृढीभव[11] ॥ १२ ॥
दुर्गापुत्रककर्णाटा[12] दाहच्छेदादिवेदनाम्[13] ।
[14]मुधा सहन्ते मुक्त्यर्थमहं[15] कस्मात्तु कातरः ॥ १३ ॥

---

1) L²., M. कल्प° — 2) L². °स्नुते — 3) M. °तं — 4) L². सेवते — 5) M. °पान्न च — 6) M. स्वस्तितः — 7) M. करोति ह्यविसंज्ञया — L². करोत्यरिसंज्ञया — 8) M. °सनं — 9) L². °स्यापि, M. °स्येऽपि — 10) L¹. °मयंनतः — 11) L². °भवः — 12) M. कल्लाटा — 13) M. °ना — 14) M. वृथा; L¹. на полѣ निप्रयोजनः — 15) L¹. °ह कस्माच्च°.

*) L¹. на полѣ: द्वेषसमाश्रितः.

न किंचिदस्ति तद्वस्तु यदभ्यासस्य दुष्करम् ।
तस्मान्मृदु[*]व्यथाभ्यासात्सोढव्यापि महाव्यथा[1] ॥ १४ ॥
उ[2]द्दंशदंशमशकक्षुत्पिपासादिवेदनाम् ।
महत्कण्ड्वादिदुःखं च किमनर्थं न पश्यसि ॥ १५ ॥
शीतोष्णवृष्टिवाताध्वव्याधिबन्धन[3]ताडनैः
सौकुमार्यं न कर्तव्यमन्यथा वर्धते व्यथा ॥ १६ ॥
केचित्स्वशोणितं दृष्ट्वा विक्रमन्ते विशेषतः ।
परशोणितमप्येके दृष्ट्वा मूर्छां व्रजन्ति[4] यत् ॥ १७ ॥
तच्चित्तस्य दृढत्वेन कातरत्वेन चागतम् ।
दुःखदुर्योधनस्तस्माद्भवेदभिभवेद्व्यथाम्[5] ॥ १८ ॥
दुःखेऽपि नैव चित्तस्य प्रसादं क्षोभयेद्बुधः ।
संग्रामे हि[6] सह क्लेशैर्युद्धे च सुलभा व्यथा[7] ॥ १९ ॥
उ[8]रसारातिघातान्ये प्रतीच्छन्तो जयन्त्यरीन् ।
ते ते विजयिनः शूराः[9] शेषास्तु मृतमारकाः ॥ २० ॥
गुणोऽपरश्च[10] दुःखस्य यत्संवेगान्मदच्युतिः[11] ।
संसारिषु च कारुण्यं पापाद्भीतिर्जिने स्पृहा ॥ २१ ॥
पित्तादिषु न मे कोपो महादुःखाकरेष्वपि[12] ।
सचेतनेषु किं कोपस्तेऽपि प्रत्ययकोपिताः ॥ २२ ॥
अनिष्यमाणमप्येतच्छूलमुत्पद्यते यथा ।
अनिष्यमाणोऽपि बलात्क्रोध उत्पद्यते तथा ॥ २३ ॥
कुप्यामीति न संचिन्त्य कुप्यति स्वेच्छया जनः ।
उत्पत्स्य इत्यभिप्रेत्य क्रोध उत्पद्यते न च[13] ॥ २४ ॥
ये केचिदपराधास्तु[14] पापानि विविधानि च ।
सर्वं तत्प्रत्ययबलात्स्वतन्त्रं तु न विद्यते ॥ २५ ॥
न च प्रत्ययसामग्र्या जनयामीति चेतना ।
न चापि जनितस्यास्ति[15] जनितोऽस्मीति चेतना ॥ २६ ॥

---

1) M. °थाः — 2) M. °मकश°; $L^{2}$. °मसक° — 3) M. °बध° — 4) $L^{2}$. व्रजपत्ति — 5) M. °स्मात्तदेव किं भवेद्व्यथां, $L^{2}$. °भिभवव्यथा, и стихъ повторяется дважды. — 6) $L^{2}$., M. °मो — 7) M. व्यथां — 8) $L^{2}$. °सारात्रि° — 9) $L^{2}$., M. सूराः — 10) $L^{2}$. ऽपरस्य — 11) $L^{1}$. °वेगादच्युतिः — 12) M. °खाः करेष्वपि — 13) M. नरः — 14) M. °धाश्च — 15) $L^{2}$. °पि.

*) $L^{1}$. на полѣ: दुःखादिवेदना.

यत्प्रधानं किलाभीष्टं यत्तदात्मेति कल्पितम् ।
तदेव हि भवामीति न संचिन्त्योपजायते ॥ २७ ॥
अनुत्पन्नं हि तन्नास्ति क इच्छेद्भवितुं तदा ।
विषयव्यावृतत्वाच्च निरोद्धुमपि नेहते ॥ २८ ॥
नित्यो ह्यचेतनश्चात्मा व्योमवत्स्फुटमक्रियः ।
प्रत्ययान्तरसङ्गेऽपि निर्विकारस्य का क्रिया ॥ २९ ॥
यः पूर्ववत्क्रियाकाले क्रियायास्तेन किं कृतम् ।
तस्य क्रियेति संबन्धे कतरत्तं[1] निबन्धनम् ॥ ३० ॥
एवं परवशं सर्वं यद्वशं सोऽपि चावशः ।
[2]निर्वाणवदचेष्टेषु भावेष्वेवं क्व[3] कुप्यते ॥ ३१ ॥
वारणापि न युक्तैवं कः किं वारयतीति[4] चेत् ।
युक्ता[5] प्रतीत्यता यस्माद्दुःखस्योपरतिर्मता[6] ॥ ३२ ॥
तस्मादमित्रं मित्रं वा दृष्ट्वाप्यन्यायकारिणम् ।
ईदृशाः प्रत्यया अस्येत्येवं[7] मत्वा सुखी भवेत् ॥ ३३ ॥
यदि तु स्वेच्छया सिद्धिः सर्वेषामेव[8] देहिनाम् ।
न भवेत्कस्यचिद्दुःखं न दुःखं कश्चिदिच्छति ॥ ३४ ॥
प्रमादादात्मनात्मानं बाधन्ते कण्टकादिभिः ।
भक्तच्छेदादिभिः कोपाद्दुरापस्त्र्यादिलिप्सया ॥ ३५ ॥
उद्बन्धनप्रपातैश्च विषापथ्यादिभक्षणैः ।
निघ्नन्ति केचिदात्मानमपुण्याचरणेन च ॥ ३६ ॥
यदैवं क्लेशवश्यत्वा[9]द्धन्त्यात्मानमपि प्रियम्[10] ।
तदैषां परकायेषु परिहारः कथं भवेत् ॥ ३७ ॥
क्लेशोन्मत्तीकृ[11]तेष्वेषु प्रवृत्तेष्वात्मघातने ।
न केवलं दया नास्ति क्रोध उत्पद्यते कथम् ॥ ३८ ॥
यदि स्वभावो बालानां परोपद्रवकारिता[12] ।
तेषु कोपो न युक्तो मे यथाग्नौ दहनात्मके ॥ ३९ ॥
अथ दोषोऽयमागन्तुः[13] सत्त्वाः प्रकृतिपेशलाः ।

---

1) M. °त्तु — 2) L². निर्माण° — 3) L². °से — 4) M. वारतीति — 5) M. युक्ताः — 6) M. °तिमता — 7) M. °तन् — 8) L¹. Еще हि и вытерто — L². °वं — 9) M. °वशत्वा° — 10) M. प्रिये — 11) M. °मत्ति° — 12) M. °ताः — 13) L¹. °त्तु.

तथाप्ययुक्तस्तत्कोपः कटुधूमे यथाम्बरे ॥ ४० ॥
मुख्यं दण्डादिकं हित्वा प्रेरके यदि कुप्यते[1] ।
द्वेषेण प्रेरितः सोऽपि द्वेषे द्वेषोऽस्तु मे वरम् ॥ ४१ ॥
मयापि पूर्वं सत्त्वानामीदृश्येव व्यथा कृता ।
तस्मान्मे युक्तमेवैतत्सत्त्वोपद्रवकारिणः ॥ ४२ ॥
तच्छस्त्रं मम कायश्च द्वयं दुःखस्य कारणम् ।
तेन शस्त्रं मया कायो गृहीतः कुत्र कुप्यते ॥ ४३ ॥
गण्डोऽयं प्रतिमाकारो गृहीतो घट्टनासहः ।
तृष्णान्धेन मया तत्र व्यथायां कुत्र कुप्यते ॥ ४४ ॥
दुःखं[2] नेच्छामि दुःखस्य हेतुमिच्छामि बालिशः ।
स्वापराधागते[3] दुःखे कस्मादन्यत्र कुप्यते ॥ ४५ ॥
असिपत्त्रवनं यद्वद्यथा नारकपक्षिणः ।
मत्कर्मजनिता एव तथेदं कुत्र कुप्यते ॥ ४६ ॥
मत्कर्मचोदिता एव जाता[4] मय्यपकारिणः ।
येन[*] यास्यन्ति[**] नरकान्मयैवामी हता ननु ॥ ४७ ॥
एतानाश्रित्य मे पापं क्षीयते क्षमतो बहु[5] ।
मामाश्रित्य तु यान्त्येते नरकान्दीर्घवेदनान् ॥ ४८ ॥
अहमेवापकार्येषां मयैते[6] चोपकारिणः ।
कस्माद्विपर्ययं कृत्वा खलचेतः प्रकुप्यसि[7] ॥ ४९ ॥
भवेन्ममाश्रयगुणो[8] न यामि नरकान्यदि ।
एषामत्र किमायातं यद्यात्मा रक्षितो मया ॥ ५० ॥
अथ प्रत्यपकारी[9] स्यां तथाप्येते न रक्षिताः ।
हीयते[10] चापि मे चर्या तस्मान्नष्टास्तपस्विनः ॥ ५१ ॥
मनो हन्तुममूर्तत्वान्न शक्यं केनचित्क्वचित् ।
शरीराभिनिवेशात्तु[11] चित्तं[12] दुःखेन बाध्यते ॥ ५२ ॥
न्यक्कारपरुषं[13] वाक्यमयशश्चेत्ययं गणः ।
कायं न बाधते तेन चेतः कस्मात्प्रकुप्यसि ॥ ५३ ॥

---

1) L². °सि — 2) L². दुःखेने° — 3) M. °धगते — 4) M. °मद्य° — 5) M. L². — L¹. °हुः — L². क्षमते — 6) M., L². ममैते — 7) M. °से — L². °षि — 8) M., L². °शयगणो — 9) M. L¹. — L². स्यात्त° — 10) L². क्षी° — 11) L¹. °शास्तु — 12) M., L². — L¹. कायो — 13) M. °कारः.

*) L¹. на полѣ: कर्मेन — **) L¹. на полѣ: रौरवादि.

मय्यप्रसादो यो ऽन्येषां स किं मां भक्षयिष्यति ।
इह जन्मान्तरे वापि येनासौ मे ऽनभीप्सितः[1] ॥ ५४ ॥
लाभान्तरायकारित्वाद्यद्यसौ मे ऽनभीप्सितः ।
[2] नङ्क्ष्यतीहैव मे लाभः पापं तु स्थास्यति ध्रुवम् ॥ ५५ ॥
वरमद्यैव मे मृत्युर्न मिथ्याजीवितं चिरम् ।
यस्माच्चिरमपि स्थित्वा मृत्युदुःखं तदेव मे ॥ ५६ ॥
स्वप्ने वर्षशतं सौख्यं भुक्त्वा यश्च विबुध्यते ।
मुहूर्तमपरो यश्च सुखी भूत्वा विबुध्यते ॥ ५७ ॥
न तन्निवर्तते[3] सौख्यं द्वयोरपि विबुद्धयोः ।
सैवोपमा मृत्युकाले चिरजीव्यल्पजीविनोः ॥ ५८ ॥
लब्धापि[4] च बहूँल्लाभां चिरं भुक्त्वा सुखान्यपि ।
रिक्तहस्तश्च नग्नश्च यास्यामि मुषितो यथा ॥ ५९ ॥
पापक्षयं च पुण्यं च लाभाज्जीवन्करोमि चेत् ।
पुण्यक्षयश्च पापं च लाभार्थं क्रुध्यतो[5] ननु ॥ ६० ॥
यदर्थमेव जीवामि तदेव यदि नश्यति ।
किं तेन जीवितेनापि केवलाशुभकारिणा ॥ ६१ ॥
अवर्णवादिनि द्वेषः सत्त्वान्नाशयतीति चेत् ।
परायशस्करे ऽप्येवं कोपस्ते किं न जायते ॥ ६२ ॥
[6] परायत्ताप्रसादत्वादप्रसादिषु[7] ते क्षमा ।
क्लेशोत्पादपरायत्ते क्षमा नावर्णवादिनि ॥ ६३ ॥
[8] प्रतिमास्तूपसद्धर्मनाशकाक्रोशकेषु च ।
न युज्यते मम द्वेषो बुद्धादीनां न हि व्यथा ॥ ६४ ॥
गुरुसालोहितादीनां प्रियाणां चापकारिषु ।
पूर्ववत्प्रत्ययोत्पादं दृष्ट्वा कोपं निवारयेत् ॥ ६५ ॥
चेतनाचेतनकृता देहिनां नियता व्यथा ।
सा व्यथा चेतने दृष्टा[9] क्षमस्वैनां व्यथां मनः ॥ ६६ ॥
मोहादेके ऽपराध्यन्ति कुप्यन्त्यन्ये ऽपि मोहिताः ।

---

1) M., L². °तं — 2) M. नदयत्ती° — L². नंक्षती° — 3) L². तत्प्रवर्तते — 4) M., L². लधा — 5) L². कुप्यते — 6) L²., M. — L¹. परायत्ता° — 7) M. °देषु — L². °दादिषु — 8) L¹. °द्धर्मानाकाशा° — 9) L¹. поправка вм. °ष्ट्वा какъ въ M. и въ L².

ब्रूमः कमेषु[1] निर्दोषं कं वा ब्रूमोऽपराधिनम् ॥ ६७ ॥
कस्मादेवं कृतं पूर्वं येनैवं बाध्यसे परैः ।
सर्वे कर्मपरायत्ताः[2] कोऽहमत्रान्यथाकृतौ ॥ ६८ ॥
एवं बुद्धा तु पुण्येषु तथायत्नं करोम्यहम् ।
येन सर्वे भविष्यन्ति मैत्रचित्ताः परस्परम् ॥ ६९ ॥
दह्यमाने गृहे यद्वदग्निर्गत्वा गृहान्तरम् ।
तृणादौ यत्र सज्जेत[3] तथा[4]कृष्यापनीयते ॥ ७० ॥
एवं चित्तं यदासङ्गाद्दह्यते[5] द्वेषवह्निना ।
तत्क्षणं तत्परित्याज्यं[6] पुण्यात्मोद्दाहशङ्कया[7] ॥ ७१ ॥
मारणीयः करं छित्त्वा मुक्तश्चेत्किमभद्रकम् ।
मनुष्यदुःखैर्नरकान्मुक्तश्चेत्किमभद्रकम् ॥ ७२ ॥
यद्येतन्मात्रमेवाद्य दुःखं सोढुं[8] न पार्यते[9] ।
तन्नारकव्यथाहेतुः क्रोधः कस्मान्नावार्यते[10] ॥ ७३ ॥
कोपार्थमेवमेवाहं नरकेषु सहस्रशः ।
कारितोऽस्मि न चात्मार्थः परार्थो वा कृतो मया ॥ ७४ ॥
न चेदं तादृशं दुःखं महार्थं च करिष्यति ।
[11]जगद्दुःखहरे दुःखे प्रीतिरेवात्र युज्यते ॥ ७५ ॥
यदि प्रीतिसुखं प्राप्तमन्यैः स्तुत्वा गुणार्जितम्[12] ।
मनस्त्वमपि तं स्तुत्वा कस्मादेवं न[13] हृष्यसि ॥ ७६ ॥
इदं च ते हृष्टिसुखं निरवद्यं सुखोदयम् ।
न वारितं च गुणिभिः परावर्जनमुत्तमम् ॥ ७७ ॥
तस्यैव सुखमित्येवं तवेदं यदि न प्रियम् ।
भृतिदानादिविरते दृष्टादृष्टं हतं भवेत् ॥ ७८ ॥
स्वगुणे कीर्त्यमाने च परसौख्यमपीच्छसि ।
कीर्त्यमाने परगुणे स्वसौख्य[14]मपि नेच्छसि ॥ ७९ ॥
बोधिचित्तं समुत्पाद्य सर्वसत्त्वसुखेच्छया ।

---

1) M., L². कामेषु — 2) M. L². — L¹. °यत्नाः — 3) M. सह्येत — 4) L²., M. तदा° — 5) L². M. दह्येत — 6) M. °त्यात्तं — 7) M. °संकया — 8) M. पाठुं — 9) M. शक्यते — 10) M., L². °न्न वार्यते — 11) M. °खःहरे — 12) M., L². गणोर्जितं — 13) M., L². — L¹. °स्मादेवह्° — 14) M. समौख्यं.

4) M., L². लघा —
— 8) L¹. °द्दर्माना-

स्वयं लब्धसुखेषश्च कस्मात्सत्त्वेषु कुप्यसि ॥ ८० ॥
त्रैलोक्यपूज्यं[1] बुद्धत्वं सत्त्वानां किल वाञ्छसि ।
सत्कारमित्वरं दृष्ट्वा तेषां किं परिवृह्यसे[2] ॥ ८१ ॥
पुष्णाति[3] यस्त्वया पोष्यं तुभ्यमेव ददाति सः ।
कुटुम्बजीविनं[4] लब्ध्वा न हृष्यसि प्रकुप्यसि ॥ ८२ ॥
स किं नेच्छति सत्त्वानां यस्तेषां बोधिमिच्छति ।
बोधिचित्तं कुतस्तस्य[5] यो ऽन्यसंपदि कुप्यति ॥ ८३ ॥
यदि तेन न तल्लब्धं स्थितं दानपतेर्गृहे ।
सर्वथापि[6] न तत्ते ऽस्ति दत्तादत्तेन तेन किम् ॥ ८४ ॥
किं वारयतु[7] पुण्यानि प्रसन्नात्स्वगुणानथ[8] ।
लभमानो न गृह्णातु वद केन न कुप्यसि ॥ ८५ ॥
न केवलं त्वमात्मानं कृतपापं न शोचसि[9] ।
कृतपुण्यैः सह स्पर्धामपरां[10] कर्तुमिच्छसि ॥ ८६ ॥
जातं चेदप्रियं शत्रोस्त्वं तुष्टया[11] किं पुनर्भवेत् ।
त्वदाशंसनमात्रेण न चाहेतुर्भविष्यति ॥ ८७ ॥
अथ त्वदिच्छया सिद्धं तद्दुःखे किं सुखं तव ।
अथाप्यर्थो भवेदेवमनर्थः को ऽन्यतः[12] परः ॥ ८८ ॥
एतद्धि बडिशं घोरं क्लेशबाडिशिकार्पितम् ।
यतो नरकपालास्त्वां क्रीत्वा[13] पचन्ति कुम्भिषु ॥ ८९ ॥
स्तुतिर्यशो ऽथ[14] सत्कारो न पुण्याय न चायुषे ।
न बलार्थं न चारोग्ये[15] न च कायसुखाय मे ॥ ९० ॥
एतावांश्च भवेत्स्वार्थो धीमतः स्वार्थवेदिनः ।
मद्यद्यूतादिसेव्यं स्यान्मानसं सुखमिच्छता ॥ ९१ ॥
यशो ऽर्थं हारयन्त्यर्थमात्मानं[16] मारयन्त्यपि ।
किमक्षराणि भक्ष्याणि मृते कस्य च तत्सुखम् ॥ ९२ ॥
यथा पांशुगृहे भिन्ने रोदित्यार्तरवं[17] शिशुः ।

---

1) M. °पूज्यबु° — 2) L², M. °दह्यसे — 3) M. मुष्णाति — 4) M. °वनं — L². लब्धा — 5) M. तेषां — 6) L². सर्वदा — L¹. सर्वास्था — 7) M. वारयत्त — 8) L²., M. प्रसन्नान्स्व° — 9) L¹. सोच्यसि — 10) L¹. स्पर्द्धायपरां — 11) M. तुष्या — 12) M. ऽर्थतः — 13) M. त्तिप्त्वा — 14) L². र्थे — 15) L². °ग्यं — 16) M. °र्थञ्चा° — 17) L². °स्वरं.

तथा स्तुतियशोहानौ स्वचित्तं प्रतिभाति मे ॥ ९३ ॥
शब्दस्तावदचित्तत्वात्स मां[1] स्तौतीत्यसंभवः[2] ।
परः किल मयि प्रीत[3] इत्येतत्प्रीतिकारणम् ॥ ९४ ॥
अन्यत्र मयि वा प्रीत्या किं हि मे परकीयया[4] ।
तस्यैव तत्प्रीतिसुखं भागो नाल्पोऽपि मे ततः[5] ॥ ९५ ॥
तत्सुखेन[6] सुखित्वं चेत्सर्वत्रैव ममास्तु तत् ।
कस्मादन्यप्रसादेन सुखितेषु न मे सुखम् ॥ ९६ ॥
तस्मादहं स्तुतोऽस्मीति[7] प्रीतिरात्मनि जायते ।
तत्राप्येवमसंबन्धात्केवलं शिशुचेष्टितम्[8] ॥ ९७ ॥
स्तुत्यादयो[9] न मे क्षेमं संवेगं नाशयन्त्यमी ।
गुणवत्सु च मात्सर्यं संपत्कोपं च कुर्वते ॥ ९८ ॥
तस्मात्स्तुत्यादिघाताय मम[10] ये[11] प्रत्युपस्थिताः ।
अपायपातरक्षार्थं प्रवृत्ता ननु ते मम ॥ ९९ ॥
मुक्त्यर्थिनश्चायुक्तं मे लाभसत्कारबन्धनम् ।
ये मोचयन्ति मां बन्धाद्द्वेषस्तेषु कथं मम ॥ १०० ॥
दुःखं प्रवेष्टुकामस्य ये कपाटत्वमागताः ।
बुद्धाधिष्ठानत इव द्वेषस्तेषु कथं मम ॥ १०१ ॥
पुण्यविघ्नः कृतोऽनेनेत्यत्र कोपो न युज्यते ।
क्षान्त्या समं तपो नास्ति न त्वेतत्तदुपस्थितम्[12] ॥ १०२ ॥
अथाहमात्मदोषेण न करोमि क्षमामिह ।
मयैवात्र कृतो विघ्नः पुण्यहेतावुपस्थिते ॥ १०३ ॥
यो[13] हि येन विना नास्ति यस्मिंश्च सति विद्यते[14] ।
स एव कारणं तस्य स कथं विघ्न उच्यते ॥ १०४ ॥
न हि कालोपपन्नेन दानविघ्नः[15] कृतोऽर्थिना[16] ।
न च[17] प्रव्राजके प्राप्ते प्रव्रज्याविघ्न उच्यते ॥ १०५ ॥
सुलभा याचका लोके दुर्लभास्त्वपकारिणः ।

---

1) M. स मा — 2) L¹. °सम्भभवः — 3) L¹. प्रीति — 4) M. °ययो — 5) L¹. तत् — 6) L¹. °तं — 7) M. स्तुत इति — 8) M. °तः — 9) L². °दयस्तु, M. °यश्च — 10) M. ये मम — 11) M. °ता — 12) M. °तः — 13) M. ये — 14) M. जायते — 15) L¹. °पन्नन्नं दान° — L². पुण्यविघ्नः — 16) L². कृतार्थिना — 17) M. हि.

यतो मे ऽनपराधस्य[1] न कश्चिदपराध्यति ॥ १०६ ॥
अश्रमोपार्जितस्तस्माद्गृहे निधिरिवोत्थितः ।
बोधिचर्यासहायत्वात्स्पृहणीयो[2] मया रिपुः ॥ १०७ ॥
मया चानेन चोपात्तं[3] तस्मादेतत्क्षमाफलम् ।
एतस्मै प्रथमं देयमेतत्पूर्वा क्षमा यतः ॥ १०८ ॥
क्षमासिद्ध्याशयो नास्य तेन पूज्यो न चेदरिः ।
सिद्धिहेतुरचित्तोऽपि सद्धर्मः पूज्यते कथम् ॥ १०९ ॥
अपकाराशयोऽस्येति शत्रुर्यदि न पूज्यते ।
अन्यथा मे कथं क्षान्तिर्भिषजीव[4] हितोद्यते ॥ ११० ॥
तद्दुष्टाशयमेवातः[5] प्रतीत्योत्पद्यते[6] क्षमा ।
स एवातः क्षमाहेतुः पूज्यः[7] सद्धर्मवन्मया ॥ १११ ॥
सत्त्वक्षेत्रं जिनक्षेत्रमित्यतो मुनिनोदितम् ।
एतानाराध्य बहवः संपत्पारं यतो गताः ॥ ११२ ॥
सत्त्वेभ्यश्च जिनेभ्यश्च बुद्धधर्मागमे समे ।
जिनेषु गौरवं यद्वन्न सत्त्वेष्विति कः क्रमः ॥ ११३ ॥
आशयस्य च माहात्म्यं न स्वतः किं तु कार्यतः ।
समं च तेन माहात्म्यं सत्त्वानां तेन ते समाः ॥ ११४ ॥
मैत्र्याशयश्च यत्पूज्यः सत्त्वमाहात्म्यमेव तत् ।
बुद्धप्रसादाद्यत्पुण्यं बुद्धमाहात्म्यमेव तत् ॥ ११५ ॥
बुद्धधर्मागमांशेन तस्मात्सत्त्वा जिनैः समाः ।
न तु[8] बुद्धैः समाः केचिदनन्तांशै[9]र्गुणार्णवैः ॥ ११६ ॥
गुणसारैकराशीनां गुणोऽणुरपि चेत्क्वचित् ।
दृश्येत[10] तस्य पूजार्थं त्रैलोक्यमपि न क्षमम् ॥ ११७ ॥
बुद्धधर्मोदयांशस्तु श्रेष्ठः सत्त्वस्य[11] विद्यते ।
एतदंशानुरूपेण सत्त्वपूजा[12] कृता भवेत् ॥ ११८ ॥
किंच निश्छद्मबन्धूनामप्रमेयो[13]पकारिणाम् ।
सत्त्वाराधनमुत्सृज्य निष्कृतिः का परा भवेत् ॥ ११९ ॥

---

1) M. ऽनपराध्यस्य — 2) M. स्पृहिणीयो — 3) L². °त्तं यस्मा° — 4) M. भैषजी° — 5) M. तं दु-ष्टाशयमे° — 6) L². प्रतीतो° — 7) M. पूज्य — 8) L². च — 9) M. °शे — 10) L²., M. दृश्यते — 11) M., L². सत्वेषु — 12) L². °जां — 13) M. °वस्तूना°.

भिन्दन्ति देहं प्रविशन्त्यवीचिं येषां कृते तत्र कृते कृतं स्यात्[*]।
महापकारिष्वपि तेन सर्वं[1] कल्याणमेवाचरितव्यमेषु ॥ १२० ॥
स्वयं मम स्वामिन एव तावद्यदर्थमात्मन्यपि निर्व्यपेक्षाः।
अहं कथं स्वामिषु तेषु तेषु करोमि मानं न तु दासभावम् ॥ १२१ ॥
येषां सुखे यान्ति मुदं मुनीन्द्रा[2] येषां व्यथायां प्रविशन्ति मन्युम्[3]।
तत्तोषणात्सर्वमुनीन्द्रतुष्टिस्तत्रापकारे ऽपकृतं मुनीनाम् ॥ १२२ ॥
आदीप्तकायस्य यथा समन्तान्न सर्वकामैरपि सौमनस्यम्।
सत्त्वव्यथायामपि तद्वदेव न प्रीत्युपायो[4] ऽस्ति दयामयानाम् ॥ १२३ ॥
तस्मान्मया यज्जनदुःखदेन दुःखं कृतं सर्वमहाकृपाणाम्।
तदद्य पापं प्रतिदेशयामि यत्खेदितास्तन्मुनयः क्षमन्ताम् ॥ १२४ ॥
आराधनायाद्य तथागतानां सर्वात्मना दास्यमुपैमि[5] लोके।
[6]कुर्वन्तु मे मूर्ध्नि पदं जनौघा[7] निघ्नन्तु वा तुष्यतु लोकनाथः ॥ १२५ ॥
आत्मीकृतं सर्वमिदं जगत्तैः कृपात्मभिः नैव हि संशयो ऽस्ति।
दृश्यन्तु एतेन तु सत्त्वरूपास्त एव नाथाः किमनादरो ऽत्र ॥ १२६ ॥
तथागताराधनमेतदेव स्वार्थस्य संसाधनमेतदेव।
लोकस्य दुःखापहमेतदेव तस्मान्ममास्तु व्रतमेतदेव ॥ १२७ ॥
यथैको राजपुरुषः प्रमथ्नाति महाजनम्।
[8]विकर्तुं नैव शक्नोति दीर्घदर्शी महाजनः ॥ १२८ ॥
यस्मान्नैव स एकाकी तस्य राजबलं बलम्।
[9]तथा न दुर्बलं कंचिदपराध्यं[10] विमानयेत् ॥ १२९ ॥
यस्मान्नरकपालाश्च कृपावन्तश्च तद्बलम्।
तस्मादाराधयेत्सत्त्वान्भृत्यश्चण्डनृपं यथा ॥ १३० ॥
कुपितः किं नृपः कुर्याद्येन स्यान्नरकव्यथा।
[11]यत्सत्त्वदौर्मनस्येन कृतेन ह्यनुभूयते ॥ १३१ ॥
तुष्टः किं नृपतिर्दद्याद्यद्बुद्धत्वसमं भवेत्।
यत्सत्त्वसौमनस्येन कृतेन ह्यनुभूयते ॥ १३२ ॥
आस्तां भविष्यद्बुद्धत्वं[12] सत्त्वाराधनसंभवम्।

---

1) L². सर्त्रः — 2) M. °न्द्राः — 3) M. मन्ध्यं — 4) L². प्रतीत्यु° — 5) L². °ति — 6) M². °न्तु ते — 7) M. °घाः — L². °नाथ — 8) L². विकर्त्त — 9) M. तस्मान्न — 10) L². °द्धं — 11) L². यत्सत्य° — 12) M. भावद्बुद्धत्वं.

*) Отсюда въ L¹. пропускъ.

इहैव सौभाग्ययशः सौस्थित्यं किं न पश्यसि ॥ १३३ ॥
प्रासादिकत्वमारोग्यं प्रामोद्यं चिरजीवितम् ।
चक्रवर्तिसुखं स्फीतं क्षमी प्राप्नोति संसरन्निति[1] ॥ १३४ ॥

बोधिचर्यावतारे क्षान्तिपारमिता षष्ठः परिच्छेदः[2] ॥

एवं क्षमो[3] भजेद्वीर्यं[4] वीर्ये बोधिर्यतः स्थिता ।
न हि वीर्यं विना पुण्यं यथा वायुं[5] विना गतिः ॥ १ ॥
किं वीर्यं कुशलोत्साहस्तद्विपक्षः क उच्यते ।
आलस्यं कुत्सिताशक्तिर्विषादात्मावमन्यना ॥ २ ॥
अव्यापारसुखास्वादनिद्रापाश्रयतृष्णया ।
संसारदुःखानुद्वेगादालस्यमुपजायते ॥ ३ ॥
क्लेशवागुरिकाघातः[6] प्रविष्टो जन्मवागुराम् ।
किमद्यापि न जानासि मृत्योर्वदनमागतः ॥ ४ ॥
स्वयूथान्मार्यमाणांस्त्वं[7] क्रमेणैवं न पश्यसि ।
तथापि निद्रां यास्येव चण्डालमहिषो यथा ॥ ५ ॥
यमेनोद्वीक्ष्यमाणस्य बद्धमार्गस्य सर्वतः ।
कथं ते रोचते भोक्तुं कथं निद्रा कथं रतिः ॥ ६ ॥
यावत्संभृतसंभारं मरणं शीघ्रमेष्यति ।
संत्यज्यापि तदालस्यमकाले किं करिष्यसि ॥ ७ ॥
इदं न प्राप्तमारब्धमिदमर्धकृतं स्थितम् ।
अकस्मान्मृत्युरायातो[8] हा हतो स्मीति चिन्तयन् ॥ ८ ॥
शोकवेगसमुच्छूनसाश्रुरक्तेक्षणाननान्[9] ।
बन्धून्निराशान्संपश्यन्यमदूतमुखानि च ॥ ९ ॥
स्वपापस्मृतिसंतप्तः शृण्वन्नादांश्च नारकान् ।
त्रासोच्चारविलिप्ताङ्गो विह्वलः किं करिष्यसि ॥ १० ॥
जीवमत्स्य इवास्मीति युक्तं भयमिहैव ते ।
किं पुनः कृतपापस्य तीव्रान्नरकदुःखतः ॥ ११ ॥

---

1) M. °रन् — 2) M. еще: समाप्तः — 3) M. क्षमो — 4) L². भवेद्वी° и поправлено какъ въ текстѣ. — 5) L². °यु — 6) M. °घातः — 7) L². °ध्यान् — 8) M. °पातो — 9) L². °शाश्रु°, M. °समुत्सृत° — 10) M. °णानानन्.

स्पृष्ट उष्णोदकेनापि सुकुमार प्रतप्यसे ।
कृत्वा च नारकं कर्म[1] किमेवं स्वस्थमास्यते ॥ १२ ॥
निरुद्यमफलाकाङ्क्षिन्सुकुमार बहुव्यथ ।
[2] मृत्युग्रस्तो मराकार हा[3] दुःखित विहन्यसे ॥ १३ ॥
मानुष्यं नावमासाद्य तर दुःखमहानदीम् ।
मूढकालो न निद्राया इयं नौर्दुर्लभा पुनः ॥ १४ ॥
मुक्त्वा धर्मरतिं श्रेष्ठामनन्तरतिसंततिम् ।
रतिरौद्धत्यहास्यादौ[4] दुःखहेतौ कथं तव ॥ १५ ॥
अविषादबलव्यूहतात्पर्यात्मविधेयता ।
परात्मसमता चैव परात्मपरिवर्तनम् ॥ १६ ॥
नैवावसादः कर्तव्यः कुतो मे बोधिरित्यतः ।
यस्मात्तथागतः सत्यं सत्यवादीदमुक्तवान् ॥ १७ ॥
तेऽप्यासन्दंशमशका मक्षिकाः कृमयस्तथा ।
*) यैरुत्साहबलात्प्राप्ता[5] दुरापा बोधिरुत्तमा ॥ १८ ॥
किमुताहं नरो जात्याशक्तो ज्ञातुं हिताहितम् ॥
सर्वज्ञानीत्यनुत्सर्गाद्[6]बोधिं किं नाप्नुयाम्यहम् ॥ १९ ॥
अथापि हस्तपादादि दातव्यमिति मे भयम् ।
गरुलाघवमूढत्वं तन्मे स्यादविचारतः ॥ २० ॥
छेत्तव्यश्चास्मि भेत्तव्यो[7] दाह्यपाट्यैरनेकशः ।
कल्पकोटीरसंख्येया न च बोधिर्भविष्यति ॥ २१ ॥
[8] एतत्तु मे परिमितं दुःखं संबोधिसाधनम् ।
नष्टशल्यव्यथापोहे[9] तदुत्पाटनदुःखवत् ॥ २२ ॥
सर्वेऽपि वैद्याः कुर्वन्ति क्रियादुःखैररोगताम् ।
तस्माद्बहूनि दुःखानि हन्तुं[10] सोढव्यमल्पकम् ॥ २३ ॥
क्रियामिमामप्युचितां वरवैद्यो न दत्तवान् ।
मधुरेणोपचारेण चिकित्सति महातुरान् ॥ २४ ॥

---

1) M. कर्म — 2) M. °ग्रस्ता — 3) M. — L². °कार स и поправлено какъ въ текстѣ. — 4) M. हासा° — 5) M. दूरापा — 6) L¹. °नुत्सद्बो° — 7) M. दाह्यः पाच्योऽप्यने° — L². भेतव्यो दाह्यः पाटो — 8) M. एतत्परिमितं दुःखं संबोधिसुखसाधनम् — L². परिमितदुःखं — 9) M. °व्यसायोह्ये — 10) M. पोढ°.

*) Здѣсь кончается пропускъ въ L¹.

आदौ शाकादिदानेऽपि[1] नियोजयति नायकः।
तत्करोति क्रमात्पश्चाद्यत्स्वमांसान्यपि त्यजेत् ॥ २५ ॥
यदा शाकेष्विव प्रज्ञा स्वमांसेऽप्युपजायते।
मांसास्थित्यजतस्तस्य तदा किं नाम दुष्करम् ॥ २६ ॥
न दुःखी त्यक्तपापत्वात्पाण्डितत्वान्न दुर्मनाः[*]।
[**] मिथ्याकल्पनया चित्ते पापात्काये यतो[2] व्यथा ॥ २७ ॥
पुण्येन कायः[3] सुखितः[4] पाण्डित्येन मनः सुखी।
तिष्ठन्परार्थं संसारे कृपालुः[5] केन खिद्यते ॥ २८ ॥
क्षपयन्[6] पूर्वपापानि प्रतीच्छन्पुण्यसागरान्।
बोधिचित्तबलादेव[7] श्रावकेभ्योऽपि शीघ्रगः ॥ २९ ॥
एवं सुखात्सुखं गच्छन्को विषीदेत्सचेतनः।
बोधिचित्तरथं प्राप्य सर्वखेदश्रमापहम् ॥ ३० ॥
छन्दःस्थामरतिर्मुक्तिबलं[8] सत्त्वार्थसिद्धये।
छन्दं दुःखभयात्कुर्यादनुशंसांश्च[9] भावयन् ॥ ३१ ॥
एवं विपक्षमुन्मूल्य यतेतोत्साहवृद्धये[10]।
छन्दमानरतित्यागतात्पर्यवशिताबलैः ॥ ३२ ॥
अप्रमेया मया[11] दोषा हन्तव्याः स्वपरात्मनोः।
एकैकस्यापि दोषस्य यत्र कल्पार्णवैः क्षयः ॥ ३३ ॥
तत्र दोषक्षयारम्भे लेशोऽपि[12] मम नेक्ष्यते[13]।
अप्रमेयव्यथाभाग्येनोरः स्फुटति मे कथम् ॥ ३४ ॥
गुणा[14] मयार्जनीयाश्च बहवः स्वपरात्मनोः।
तत्रैकैकगुणाभ्यासो[15] भवेत्कल्पार्णवैर्न वा ॥ ३५ ॥
गुणलेशेऽपि[16] नाभ्यासो मम जातः कदाचन।
वृथानीतं[***] मया जन्म[****] कथंचिल्लब्धमद्भुतम्[*****] ॥ ३६ ॥
न प्राप्तं भगवत्पूजामहोत्सवसुखं मया।

---

1) M. °दानेन नि° — 2) $L^{2}$. यथौ — Въ $L^{1}$. на полѣ जायते — 3) $L^{2}$., M. सुखितः कायः — 4) $L^{2}$. °तेन — 5) $L^{2}$., M दयालुः — 6) $L^{1}$. क्षपमन् — 7) $L^{2}$. °ष — 8) M. छन्दस्थानरतिर्मुक्तिर्बलं — $L^{2}$. °रतिर्मुक्तिर्ब° — 9) M. °शंसाश्च — 10) M. यत्ततो° — 11) $L^{1}$. Еще मया и стерто. — 12) M. लेषे — $L^{2}$. लसा — 13) M. नेक्षते — 14) M. गुणानुपार्ज° — 15) M. यत्रै° — $L^{2}$. °गुणो — 16) M. °से, $L^{2}$. °सो.

*) $L^{1}$. на полѣ: न संकितमनाः — **) $L^{1}$. на полѣ: विकल्पचित्तेन — ***) $L^{1}$. на полѣ: दुःखे — ****) $L^{1}$. на полѣ: आत्म — *****) $L^{1}$. на полѣ: मानुष्यजन्म.

न कृताः[1] शासने[†] कारा[††] दरिद्राशा न पूरिता ॥ ३७ ॥
भीतेभ्यो नाभयन्दत्तमार्ता न सुखिनः कृताः ।
दुःखाय केवलं मातुर्गतोऽहं गर्भशल्यताम् ॥ ३८ ॥
धर्मच्छन्दवियोगेन पौर्विकेण ममाधुना ।
विपत्तिरीदृशी जाता को धर्मे छन्दमुत्सृजेत्[†††] ॥ ३९ ॥
कुशलानां च सर्वेषां छन्दं मूलं मुनिर्जगौ ।
तस्यापि मूलं सततं[2] विपाकफलभावना ॥ ४० ॥
दुःखानि दौर्मनस्यानि भयानि विविधानि च ।
अभिलाषविघाताश्च जायन्ते पापकारिणाम् ॥ ४१ ॥
मनोरथः शुभकृतां यत्र यत्रैव गच्छति ।
तत्र तत्रैव तत्पुण्यैः फलार्घेणाभिपूज्यते ॥ ४२ ॥
पापकारिसुखेच्छा तु[3] यत्र यत्रैव गच्छति ।
तत्र तत्रैव तत्पापैर्दुःखशस्त्रैर्विहन्यसे[4] ॥ ४३ ॥
विपुलसुगन्धिशीतल[5]सरो[6]रुहगर्भगता मधुर[*]जिनस्वरासन[7]कृतोपचितद्युतयः ।
मुनिकरबोधिताम्बुजविनिर्गतसद्वपुषः सुगतसुता भवन्ति सुगतस्य पुरः कुशलैः ॥ ४४ ॥
यमपुरुषापनीतसकलच्छविरार्तरवो हुतवहताय वि[8]द्रुतकताम्रनिषिक्ततनुः ।
ज्वलदसिशक्तिघातशत[9]शातितमांसदलः पतति सुतप्तलोहधरणीष्वशुभैर्बहुशः ॥ ४५ ॥
तस्मात्कार्यः शुभच्छन्दो भावयित्वैवमादरात् ।
वज्रध्वजस्य विधिना मानं त्वारभ्य भावयेत् ॥ ४६ ॥
पूर्वं निरूप्य सामग्रीमारभेन्नारभेत वा ।
अनारम्भो वरं नाम न त्वारभ्य निवर्तनम् ॥ ४७ ॥
जन्मान्तरेऽपि सोऽभ्यासः पापाद्दुःखं च वर्धते ।
अन्यच्च कार्यकालं च हीनं तच्च न साधितम् ॥ ४८ ॥
त्रिषु मानो[10] विधातव्यः कर्मोपक्लेशशक्तिषु ।
मयैवैकेन कर्तव्यमित्येषा कर्ममानिता[11] ॥ ४९ ॥
[12]क्लेशास्वतन्त्रो लोकोऽयं न क्षमः स्वार्थसाधने ।

---

1) M., L[2]. °ता — 2) L[2]. शततं — 3) M. °क्रान्त — 4) M., L[2]. °ते — 5) M. सुशीत° — 6) L[2]. शरो — 7) M. °शन° — 8) L[1]. °ताप द्रुतक° — 9) L[1]. °सातित — 10) M. माने — 11) M. °ताः — 12) L[1]. क्लेशाश्च°

†) L[1]. на полѣ: तथागतसासेन — ††) L[1]. на полѣ: पूजा — †††) L[1]. Еще стихъ: पापकारिसुखेच्छा तु यत्र यत्रैव गच्छ. См. ниже 43.

*) L[1]. на полѣ: तथागतसधर्मसब्दसुरूप.

तस्मान्मयास्य[1] कर्तव्यं नाशक्तोऽहं यथा जनः ॥ ५० ॥
नीचं कर्म करोत्यन्यः कथं मय्यपि तिष्ठति ।
मानाच्चेन्न करोम्येतन्मानो नश्यतु मे वरम् ॥ ५१ ॥
मृतं डुण्डुभमासाद्य काकोऽपि गरुडायते ।
आपदाबाधते ऽल्पापि मनो मे यदि डुर्बलम् ॥ ५२ ॥
विषादकृतनिश्चेष्ट आपदः[2] सुकरा ननु ।
व्युत्थितश्चेष्टमानस्तु महतामपि डुर्जयः ॥ ५३ ॥
तस्माद्दृढेन चित्तेन करोम्यापदमापदः[*] ।
त्रैलोक्यविजिगीषुत्वं[3] ह्यास्यमावर्जितस्य[4] मे ॥ ५४ ॥
मया हि सर्वं जेतव्यमहं जेयो न केनचित् ।
मयैष मानो वोढव्यो जिनसिंहसुतो ह्यहम् ॥ ५५ ॥
ये सत्त्वा मानविजिता वराकास्ते न मानिनः ।
मानी शत्रुवशं नैति[5] मानशत्रुवशाश्च[6] ते ॥ ५६ ॥
मानेन डुर्गतिं नीता मानुष्येऽपि हतोत्सवाः ।
परपिण्डासिनो[7] दासा मूर्खा डुर्दर्शनाः कृषाः ॥ ५७ ॥
सर्वतः परिभूताश्च[8] मानस्तब्धास्तपस्विनः ।
ते ऽपि चेन्मानिनां मध्ये दीनास्तु वद कीदृशाः ॥ ५८ ॥
ते मानिनो[**] विजयिनश्च त एव शूरा[9] ये मानशत्रुविजयाय वहन्ति मानम् ।
ये तं[***] स्फुरन्तमपि मानरिपुं निहत्य[****] कामं जने जयफलं प्रतिपादयन्ति ॥ ५९ ॥
संक्लेशपत्नमध्यस्थो भवेद्दृप्तः सहस्रशः ।
डुर्योधनः क्लेशगणैः सिंहो मृगगणैरिव ॥ ६० ॥
महत्स्वपि हि कृच्छ्रेषु न रसं चतुरीक्षते[10] ।
एवं कृच्छ्रमपि प्राप्य न क्लेशवशगो भवेत् ॥ ६१ ॥
यदेवापद्यते कर्म तत्कर्मव्यसनी भवेत् ।
तत्कर्मशौण्डो[11] ऽतृप्तात्मा क्रीडासुखफलेप्सुवत्[12] ॥ ६२ ॥

---

1) M. तस्मान्मयैषां — 2) M. °रो — L¹. на полѣ: सुलफा (sic) — 3) L¹. °जगी° — 4) M., L². ह्यास्यमापज्जितस्य — L¹. на полѣ: त्यक्तः — 5) M., L². नेति — 6) L². M. °शास्तु — 7) L¹. °सनो и поправка: °सि° — 8) L¹ परिभूता — 9) M. धीराः — L¹. L². सूरा — 10) L². M. °ह्यते— 11) L². °सौण्डो — 12) M. °त्सुवत्.

*) L¹. на полѣ: विपत्तियां विपत्ति — **) L¹. на полѣ: मानो रागादि जेतवान् — ***) L¹. на полѣ: सत्वा मानं — ****) L¹ на полѣ: यथेष्ट.

सुखार्थं क्रियते कर्म तथापि स्यान्न वा सुखम्।
कर्मैव तु सुखं यस्य निष्कर्मा[1] स सुखी कथम्॥ ६३॥
कामैर्न तृप्तिः संसारे क्षुरधारामधूपमैः।
पुण्यामृतैः कथं तृप्तिर्विपाकमधुरैः शिवैः॥ ६४॥
तस्मात्कर्मावसानेऽपि निमज्जेत्तत्र कर्मणि।
यथा मध्याह्नसंतप्त आदौ प्राप्तसरः करी॥ ६५॥
बलनाशानुबन्धे[2] तु पुनःकर्तुं परित्यजेत्।
सुसमाप्तं च तन्मुञ्चेदुत्तरोत्तरतृष्णया॥ ६६॥
क्लेशप्रहारान्संरक्षन्[3] क्लेशांस्तु[4] प्रहरेद्दृढम्।
खड्गयुद्धमिवापन्नः शिक्षितेनारिणा सह॥ ६७॥
तत्र खड्गं यथा भ्रष्टं गृह्णीयाद्भयसत्वरम्।
स्मृतिखड्गं तथा भ्रष्टं गृह्णीयान्नरकान्स्मरन्॥ ६८॥
विषं रुधिरमासाद्य प्रसर्पति यथा तनौ।
तथैव छिद्रमासाद्य दोषश्चित्ते प्रसर्पति॥ ६९॥
तैलपात्रधरो यद्वदसिहस्तैरधिष्ठितः[5]।
स्खलिते मरणत्रासात्तत्परः स्यात्तथा व्रती॥ ७०॥
तस्मादुत्सङ्गगे सर्पे[6] यथोत्तिष्ठति सत्वरम्।
निद्रालस्यागमे तद्वत्प्रतिकुर्वीत सत्वरम्॥ ७१॥
एकैकस्मिंश्छले[7] सुष्ठु परितप्य विचिन्तयेत्।
कथं करोमि येनेदं पुनर्मे न भवेदिति॥ ७२॥
संसर्गं कर्म वा प्राप्तुमिच्छेदेतेन[8] हेतुना।
कथं नामास्ववस्थासु स्मृत्यभ्यासो भवेदिति॥ ७३॥
लघुं[9] कुर्यात्तथात्मानमप्रमादकथां स्मरन्।
कर्मागमाद्यथापूर्वं सज्जः सर्वत्र वर्तते[10]॥ ७४॥
यथैव तूलकं वायोर्गमनागमने वशम्।
तथोत्साहवशं यायादृद्धिश्चैवं[11] समृध्यति॥ ७५॥

बोधिचर्यावतारे वीर्यपारमिता सप्तमः परिच्छेदः॥

---

1) L². निःकर्मा — 2) M. — L¹., L². °नाशा° — 3) L². °क्षेत — 4) L². °शाश्च — 5) L². °ष्ठितं — 6) M. सर्पे — 7) M. छले — L². स्थले — 8) L²., M. °प्तमि° — L². संसर्गकर्म — 9) M. लघु — 10) L¹. प्रवर्त्तते, и प्र зачеркнуто. — 11) L²., M. यायादृ°.

वर्धयित्वैवमुत्साहं समाधौ स्थापयेन्मनः।
विक्षिप्तचित्तस्तु नरः क्लेशदंष्ट्रान्तरे स्थितः॥ १॥
कायचित्तविवेकेन[1] विक्षेपस्य न संभवः।
तस्माल्लोकं परित्यज्य वितर्कान्[*]परिवर्जयेत्॥ २॥
स्नेहान्न त्यज्यते[2] लोको लाभादिषु च तृष्णया।
तस्मादेतत्परित्यागे विधानेवं[3] विभावयेत्[4]॥ ३॥
शमथेन विपश्यनासुयुक्तः[5] कुरुते क्लेशविनाशमित्यवेत्य[6]।
शमथः प्रथमं गवेषणीयः स च लोके निरपेक्षयाभिरत्या॥ ४॥
कस्यानित्येष्वनित्यस्य स्नेहो भवितुमर्हति।
येन जन्मसहस्राणि द्रष्टव्यो न पुनः प्रियः॥ ५॥
अपश्यन्नरतिं याति समाधौ न च तिष्ठति।
न च तृप्यति दृष्ट्वापि पूर्ववद्बाध्यते[7] तृषा॥ ६॥
न पश्यति[8] यथाभूतं संवेगादवहीयते।
दह्यते तेन शोकेन प्रियसंगमकाङ्क्षया॥ ७॥
तच्चिन्तया मुधा याति[9] ह्रस्वमायुर्मुहुर्मुहुः।
अशाश्वतेन मित्रेण धर्मो भ्रश्यति शाश्वतः॥ ८॥
बालैः सभागचरितो नियतं याति दुर्गतिम्।
नेष्यते[10] विषभागश्च किं प्राप्तं बालसंगमात्॥ ९॥
क्षणाद्भवन्ति सुहृदो भवन्ति रिपवः क्षणात्।
तोषस्थाने प्रकुप्यन्ति दुराराधाः पृथग्जनाः॥ १०॥
हितमुक्ताः प्रकुप्यन्ति वारयन्ति च मां हितात्।
अथ न श्रूयते तेषां कुपिता यान्ति दुर्गतिम्॥ ११॥
ईर्ष्योत्कृष्टान्समान्द्वन्द्वो[11] हीनात्मानः[12] स्तुतेर्मदः।
अवर्णात्प्रतिघश्चेति कदा बालाद्धितं भवेत्॥ १२॥
आत्मोत्कर्षः[13] परावर्णः संसाररतिसंकथा।
इत्याद्यवश्यमशुभं[14] किंचिद्बालस्य बालतः॥ १३॥

---

1) M. वितर्केन — 2) L². त्यजते — 3) L²., M. विद्वानेवं — 4) M., L². विचारयेत् — 5) M. °नया — L². सुप्रयुक्तः — 6) M. °नाशन° — 7) L². बाधते — 8) L². °न्ति — 9) L¹. यान्ति — 10) L². नेष्यन्ते विस° — 11) M. °ष्टात्समाद्व° — L². इर्ष्यो° — 12) M. हीनामानस्तुते° — 13) M. °र्ष — 14) L¹. इत्याद्यमवश्यम° но म зачеркнуто.

*) L¹. на полѣ: रागादिभिः.

एवं तस्यापि तत्सङ्गात्[1]तेनानर्थसमागमः[2] ।
एकाकी विहरिष्यामि सुखमक्लिष्टमानसः ॥ १४ ॥
बालाद्दूरं पलायेत्[3] प्राप्तमाराधयेत्प्रियैः ।
न संस्तवानुबन्धेन किं तूदासीनसाधुवत्[4] ॥ १५ ॥
धर्मार्थमात्रमादाय भृङ्गवत्कुसुमान्मधुः ।
अपूर्व इव सर्वत्र विहरिष्याम्यसंस्तुतः ॥ १६ ॥
लाभी च सत्कृतश्चाहमिच्छन्ति बहवश्च माम् ।
इति मर्त्यस्य संप्राप्तान्मरणाज्जायते भयम् ॥ १७ ॥
यत्र यत्र रतिं याति मनः सुखविमोहितम्[5] ।
तत्तत्सहस्रगुणितं दुःखं भूत्वोपतिष्ठति[6] ॥ १८ ॥
तस्मात्प्राज्ञो न तामिच्छेदिच्छातो जायते भयम् ।
स्वयमेव च यात्येतद्धैर्यं कृत्वा प्रतीक्ष्य ताम् ॥ १९ ॥
बहवो लाभिनो ऽभूवन् बहवश्च यशस्विनः ।
सह लाभयशोभिस्तेन ज्ञाताः क्व गता इति ॥ २० ॥
मामेवान्ये जुगुप्सन्ति किं प्रहृष्याम्यहं स्तुतः ।
मामेवान्ये प्रशंसन्ति किं विषीदामि निन्दितः[7] ॥ २१ ॥
नानाधिमुक्तिकाः सत्त्वा जिनैरपि न तोषिताः ।
किं पुनर्मादृशैरज्ञैस्तस्मात्किं लोकचिन्तया ॥ २२ ॥
निन्दन्त्यलाभिनं सत्त्वमवध्यायन्ति लाभिनम् ।
प्रकृत्या दुःखसंवासैः कथं तैर्जायते रतिः ॥ २३ ॥
न बालः कस्यचिन्मित्रमिति चोक्तं तथागतैः ।
न स्वार्थेन विना प्रीतिर्यस्माद्बालस्य जायते ॥ २४ ॥
स्वार्थद्वारेण या प्रीतिरात्मार्थं प्रीतिरेव सा ।
द्रव्यनाशे यथोद्वेगः सुखहानिकृतो हि सः ॥ २५ ॥
नावध्यायन्ति तरवो न चाराध्याः प्रयत्नतः ।
कदा तैः सुखसंवासैः सह वासो भवेन्मम ॥ २६ ॥
शून्यदेवकुले स्थित्वा वृक्षमूले गुहासु वा ।
कदानपेक्षो यास्यामि पृष्ठतोऽनवलोकयन् ॥ २७ ॥

---

1) M. सत्संगा° — 2) L². °नर्थः समागमः — 3) M. पलापये — L². प्रलापेत् — 4) L². °साधुव्रतः — 5) L². °तः — 6) L²., M. °ते — 7) M. विनिन्दितः.

अममेषु प्रदेशेषु विस्तीर्णेषु स्वभावतः ।
स्वच्छन्दचार्यनिलयो विहरिष्याम्यहं कदा ॥ २८ ॥
[1] मृत्पात्रमात्रविभवश्चौरासंभोगचीवरः ।
निर्भयो विहरिष्यामि कदा कायमगोपयन् ॥ २९ ॥
कायभूमिं निजां गत्वा कङ्कालैरपरैः सह ।
स्वकायं तुलयिष्यामि कदा सडनधर्मिणाम्[2] ॥ ३० ॥
अयमेव हि कायो मे एवं पूतिर्भविष्यति ।
शृगाला अपि यद्गन्धान्नोपसर्पेयुरन्तिकम्[3] ॥ ३१ ॥
अस्यैकस्यापि कायस्य सहजा[4] अस्थिखण्डकाः ।
पृथक्पृथग्गमिष्यन्ति किमुतान्यः प्रियो जनः ॥ ३२ ॥
एक उत्पद्यते जन्तुर्म्रियते चैक एवं हि ।
नान्यस्य तद्व्यथाभागः किं प्रियैर्विघ्नकारकैः ॥ ३३ ॥
अध्वानं प्रतिपन्नस्य यथा वासपरिग्रहः ।
तथा भवाध्वगस्यापि जन्मावासपरिग्रहः ॥ ३४ ॥
चतुर्भिः पुरुषैर्यावत्स न निर्धार्यते ततः ।
[5] अशोच्यमानो लोके न तावदेव वनं व्रजेत् ॥ ३५ ॥
असंस्तवाविरोधाभ्यामेक एव शरीरकः[6] ।
पूर्वमेव मृतो लोके म्रियमाणो न शोचति[7] ॥ ३६ ॥
न चान्तिकचराः केचिच्छोचन्तः कुर्वते व्यथाम् ।
बुद्धाद्यनुस्मृतिं चास्य विक्षिपन्ति न केचन ॥ ३७ ॥
तस्मादेकाकिता[8] रम्या निरायासा[9] शिवोदया ।
सर्वविक्षेपसमनी सेवितव्या सदा मया ॥ ३८ ॥
सर्वान्यचिन्तानिर्मुक्तः स्वचित्तैकाग्रमानसः[*] ।
समाधानाय चित्तस्य प्रयतिष्ये[10] दमाय च ॥ ३९ ॥
कामा ह्यनर्थजनका इह लोके परत्र च ।
इह बन्धवधच्छेदैर्[11] नरकादौ[12] परत्र च ॥ ४० ॥

---

1) L². °विभत्रैश्चौ° —, °चीवरं — 2) L². सत्तन°, M. शतन° — 3) L¹., M. °सर्प्यपुर° — L². पङ्गन्धान्नो° — L¹. यद्गत्वान्नो° — 4) M. अस्ति — 5) L²., M. — L¹. आशो° — 6) M. °कम् — 7) L². सोच्यति — 8) L². विक्रिडाता — 9) M., L². — L¹. निरायाशा — 10) M. प्रयतिस्ये — 11) M., L². °बध° — 12) L¹. यत्रत्र.

*) L¹. на полѣ: बोधिचित्त.

यदर्थं दूतदूतीनां [1]कृताञ्जलिरनेकधा ।
न च पापमकीर्तिर्वा यदर्थं गणिता पुरा ॥ ४१ ॥
प्रतिमश्च [2]भयेऽप्यात्मा द्रविणं च व्ययीकृतम् ।
यान्येव च परिष्वज्य बभूवोत्तमनिर्वृतिः [3]॥ ४२ ॥
तान्येवास्थीनि नान्यानि स्वाधीनान्यममानि च ।
प्रकामं संपरिष्वज्य किं न गच्छसि निर्वृतिम् ॥ ४३ ॥
उन्नाम्यमानं [4]यन्नाद्यन्नीयमानमधो ह्रिया ।
पुरादृष्टमदृष्टं वा मुखं जालिकयावृतम् ॥ ४४ ॥
तन्मुखं त्वत्परिक्लेशमसहद्भिरिवाधुना ।
गृध्रैर्व्यक्तीकृतं पश्य किमिदानीं पलायसे ॥ ४५ ॥
[5]परचक्षुर्निपातेभ्यो ऽप्यासीद्यत्परिरक्षितम् ।
तदद्य भक्षितं यावत्किमीर्ष्यालो न रक्षसि [6]॥ ४६ ॥
मांसोच्छ्रयमिमं [7]दृष्ट्वा गृध्रैरन्यैश्च भक्षितम् [8]।
आहारः पूज्यते [9]येषां स्रक्चन्दनविभूषणैः ॥ ४७ ॥
निश्चलादपि ते त्रासः कङ्कालादेवमीक्षितात् [10]।
वेताडेनेव केनापि चाल्यमानाद्भयन्न किम् ॥ ४८ ॥
यत्र छन्ने ऽप्ययं रागस्तदछन्नं किमप्रियम् ।
न चेत्प्रयोजनं तेन कस्माच्छन्नं विमृद्यते ॥ ४९ ॥[*]
[11]एकस्मादशनादेषां [12]लालामेध्यं च जायते ।
तत्रामेध्यमनिष्टं ते लालापानं कथं प्रियम् ॥ ५० ॥
तूलगर्भैर्मृदुस्पर्शै रमन्ते नोपधानकैः ।
दुर्गन्धं न स्रवन्तीति कामिनो ऽमेध्यमोहिताः ॥ ५१ ॥
यदि तेनाशुचौ [13]रागः कस्मादालिङ्गसे परम् ।
मांसकर्दमसंलिप्तं स्नायुबद्धास्थिपञ्जरम् ॥ [**] ५२ ॥
स्वमेव बह्वमेध्यं ते तेनैव धृतिमाचर ।
अमेध्यभस्त्रामपरां गूथघस्मर विस्मर ॥ ५३ ॥

---

1) L². , M. कृतो ऽञ्जलि° — 2) L¹. °मं и анусвара вытерта. — 3) M. °निर्वृत्तिः — 4) L²., M. यत्नाद्यत्नो° — 5) L²., M. — L¹. परचक्षुनि° — 6) L²., M. — L¹. °ष्यानलो नरसि — 7) L². °दं — 8) L¹. °तः — 9) L². तेषां — 10) L¹., L². °तान् — 11) L². °स्मादर्श° — 12) L²., M. — L¹. लाह्ला° — 13) L². °सुचौ.

*) L². ४९ нѣтъ. — **) L². вставлено здѣсь ४९.

मांसप्रियो ऽह्मस्येति[1] स्प्रष्टुं द्रष्टुं च वाञ्छसि ।
अचेतनं स्वभावेन मांसत्वं[2] कथमिच्छसि ॥ ५४ ॥
यदिच्छसि न[3] तच्चित्तं स्प्रष्टुं द्रष्टुं च शक्यते ।
यच्च शक्यं न तद्वेत्ति किं तदालिङ्गसे मुधा ॥ ५५ ॥
नामेध्यमयमन्यस्य कायं वेत्सीत्यनद्भुतम् ।
स्वामेध्यमय[4] एव त्वं तं नावैषीति विस्मयः ॥ ५६ ॥
विघनार्कांशुविकचं मुक्त्वा तरुणपङ्कजम् ।
अमेध्यशौण्ड[5]चित्तस्य का रतिर्गूथपञ्जरे ॥ ५७ ॥
मृदाद्यमेध्यलिप्तत्वाद्यदि न स्प्रष्टुमिच्छसि ।
यतस्तन्निर्गतं कायात्तं स्प्रष्टुं कथमिच्छसि ॥ ५८ ॥
यदि ते नाशुचौ रागः कस्मादालिङ्गसे परम् ।
अमेध्यक्षेत्रसंभूतं तद्बीजं तेन वर्धितम् ॥ ५९ ॥
[6]अमेध्यभवमल्पत्वान्न वाञ्छस्यशुचिकृमिम् ।
बह्वमेध्यमयं कायममेध्यजमपीच्छसि ॥ ६० ॥
न केवलममेध्यत्वमात्मीयं न जुगुप्ससि[7] ।
अमेध्यभा[8]ण्डानपरान्गूथघस्मर[9] वाञ्छसि ॥ ६१ ॥
कर्पूरादिषु हृद्येषु शाल्यं न व्यञ्जनेषु वा ।
मुखक्षिप्तविसृष्टेषु भूमिरप्यशुचिर्मता ॥ ६२ ॥
यदि प्रत्यक्षमप्येतदमेध्यं नाधिमुच्यसे ।
श्मशाने पतितान्घोरान्कायान्पश्यापरानपि ॥ ६३ ॥
चर्मण्युत्पाटिते[10] यस्माद्भयमुत्पद्यते महत् ।
कथं ज्ञात्वापि तत्रैव पुनरुत्पद्यते रतिः ॥ ६४ ॥
काये न्यस्तो ऽप्यसौ गन्धश्चन्दनादेव नान्यतः ।
अन्यदीयेन गन्धेन कस्मादन्यत्र रज्यते[11] ॥ ६५ ॥
यदि स्वभावदौर्गन्ध्याद्रागो[12] नात्र शिवं ननु ।
किमनर्थरुचिर्लोकस्तद्गन्धेनानुलिम्पति[13] ॥ ६६ ॥

---

1) $L^{2}$., M. ऽह्मस्मीति — 2) $L^{2}$. मांसं — M. मांसां — 3) $L^{1}$. нѣтъ. — 4) $L^{2}$., M. °मेध्यमयमेव — $L^{2}$. °वैसो° — 5) $L^{1}$., $L^{2}$., M. °सौण्ड° — 6) M. अमेध्यभवमेव त्वं — 7) $L^{2}$. °ट्स्यसि — 8) $L^{1}$. °भाण्डमय° — 9) $L^{1}$. °घर — 10) M., $L^{2}$. °द्घाटिते — 11) M., $L^{2}$. °से — 12) M. °न्धाद्र° — $L^{2}$. स्वभावादौ° — 13) $L^{2}$. °रुचिलो°, °म्प्यति.

कायस्यात्र किमायातं सुगन्धि यदि चन्दनम् ।
अन्यदीयेन गन्धेन कस्मादन्यत्र रज्यते[1] ॥ ६७ ॥
यदि[2] केशनखैर्दीर्घैर्दन्तैः समलपाण्डरैः[3] ।
मलपङ्कधरो नग्नः कायः प्रकृतिभीषणः ॥ ६८ ॥
स किं संस्क्रियते यत्नादात्मघाताय शस्त्रवत् ।
आत्मव्यामोहनोद्युक्तैरुन्मत्तैराकुला मही ॥ ६९ ॥
कङ्कालान्कतिचिद्दृष्ट्वा श्मशाने किल ते घृणा ।
[*] ग्रामश्मशाने[4] रमसे चलत्कङ्कालसंकुले ॥ ७० ॥
एवं चामेध्यमप्येतद्विना मूल्यं न लभ्यसे[5] ।
तदर्थमर्जनायासो[6] नरकादिषु च व्यथा ॥ ७१ ॥
शिशोर्नार्जनसामर्थ्यं केनासौ यौवने सुखी[7] ।
यात्यर्जनेन तारुण्यं वृद्धः कामैः करोति किम् ॥ ७२ ॥
केचिद्दिनान्तव्यापारैः परिश्रान्ताः कुकामिनः ।
गृहमागत्य सायाह्ने शेरते स्म मृता इव ॥ ७३ ॥
[**] दण्डयात्राभिरपरे प्रवासक्लेशदुःखिताः ।
वत्सरैरपि नेक्षन्ते[8] पुत्रदारांस्तदर्थिनः ॥ ७४ ॥
यदर्थमेव विक्रीत आत्मा कामविमोहितैः ।
तं न प्राप्तं[9] मुधैर्वायुर्नीतं तु परकर्मणा ॥ ७५ ॥
विक्रीतस्वात्मभावानां[10] सदा प्रेषणकारिणाम् ।
प्रसूयन्ते स्त्रियोऽन्येषामटवीविटपादिषु ॥ ७६ ॥
रणं जीवितसंदेहं विशन्ति किल जीवितुम् ।
मानार्थं दासतां यान्ति मूढाः कामविडम्बिताः ॥ ७७ ॥
छिद्यन्ते कामिन[11] केचिदन्ये शूलसमर्पिताः ।
दृश्यन्ते दह्यमानाश्च हन्यमानाश्च शक्तिभिः ॥ ७८ ॥
अर्जनरक्षणनाश[12]विषादैरर्थमनर्थमनन्तमवेहि ।
व्यग्रतया धनशक्तमतीनां नावसरो[13] भवदुःखविमुक्तेः[14] ॥ ७९ ॥

---

1) L². °से — 2) L². °खदी° — 3) M. °पाण्डरैः — 4) L¹. श्रीमसाने — 5) L², M. °ते — 6) L¹. तद्दंधमर्ज्जायासो — 7) L¹. मखीः — 8) M. — L². नेद्यन्ते — 9) L¹. нѣтъ. — M. पुनैवायुनी° — 10) M. आत्म° — 11) L²., M. कामिनः — 12) L¹. °नासविसा° — 13) L². नावश° — 14) L². °क्तैः — M. क्तैय.

*) L¹. весь листъ вытертъ и возстановленъ очень дурно другою рукою. — **) L¹. совсѣмъ не ясно до конца 77.

एवमादीनवो भूयानल्पास्वादस्तु[1] कामिनाम् ।
शकटवहनो[2] यद्वत्पशोर्घासलवग्रहः ॥ ८० ॥

तस्यास्वादलवस्यार्थे यः पशोरप्यदुर्लभः ।
हता[3] दैवहतेनेयं क्षणसंपत्सुदुर्लभा ॥ ८१ ॥

अवश्यं गन्तुरल्पस्य नरकादिप्रपातिनः ।
कायस्यार्थे कृतो योऽयं सर्वकालं परिश्रमः ॥ ८२ ॥

ततः कोटिशतेनापि श्रमभागेन बुद्धता ।
चर्यादुःखान्महद्दुःखं सा च बोधिर्न कामिनाम् ॥ ८३ ॥

न शस्त्रं न विषं नाग्निर्न प्रपातो न वैरिणः ।
कामिनामुपमां[4] यान्ति नरकादिव्यथास्मृतेः[5] ॥ ८४ ॥

एवमुद्विज्य कामेभ्यो विवेके[6] जनयेद्रतिम् ।
कलहायासशून्यासु शान्तासु वनभूमिषु ॥ ८५ ॥

धन्यैः[7] शशाङ्ककरचन्दनशीतलेषु रम्येषु[8] हर्म्यविपुलेषु शिलातलेषु ।
निः शब्दसौम्यवनमारुतवीज्यमानैश्चङ्क्रम्यते परहिताय विचिन्त्यते च ॥ ८६ ॥

विहृत्य यत्र क्वचिदिष्टकालं शून्यालये वृक्षतलं[9] गुहासु ।
परिग्रहारक्षणखेदमुक्तश्चरत्यपेक्षाविरतो यथेष्टम् ॥ ८७ ॥

स्वच्छन्दचार्यनिलयः प्रतिबद्धो न कस्यचित् ।
यत्संतोषसुखं भुङ्क्ते तदिन्द्रस्यापि दुर्लभम् ॥ ८८ ॥

एवमादिभिराकारैर्विवेकगुणभावनात् ।
उपशान्तवितर्कः[10] सन्बोधिचित्तं तु भावयेत् ॥ ८९ ॥

परात्मसमतामादौ भावयेदेवमादरात् ।
समदुःखसुखाः सर्वे पालनीया मयात्मवत् ॥ ९० ॥

हस्तादिभेदेन बहुप्रकारः कायो यथैकः परिपालनीयः ।
तथा जगद्भिन्नमभिन्नदुःखं सुखात्मकं[11] सर्वमिदं तथैव ॥ ९१ ॥

यद्यप्यन्येषु देहेषु मद्दुःखं न प्रबाधते ।
तथापि तद्दुःखमेव[12] ममात्मस्नेहदुःसहम्[13] ॥ ९२ ॥

---

1) M. °दन्तु — 2) M. °टहतो यद्वद्यशोर्घा° — L¹. °त्पशोलघा° - - - °गहः — L². °वहतो — 3) M. दैव° — 4) L¹. °मा — 5) L¹. °ते — 6) L¹. °क — 7) M. धान्यैः — 8) L². हर्म्म° — 9) L²., M. °तले — 10) L². संबो° — 11) M. °भिन्नदुःखसुखात्मकं — L¹. °भिन्नं दुःख° — 12) L². еще: तस्य — 13) L². °स्नेहेन.

तथा यद्यप्यसंवेद्यमन्यद्दुःखं[1] मयात्मना ।
तथापि तस्य तद्दुःखमात्मस्नेहेन दुःसहम् ॥ ९३ ॥
मयान्यद्दुःखं[1] हन्तव्यं दुःखत्वादात्मदुःखवत् ।
अनुग्राह्या मयान्ये ऽपि सत्त्वत्वादात्मसत्त्ववत् ॥ ९४ ॥
यदा मम परेषां च तुल्यमेव[2] सुखं प्रियम् ।
तदात्मनः को विशेषो येनात्रैव सुखोद्यमः ॥ ९५ ॥
यदा मम परेषां च भयं दुःखं च न प्रियम् ।
तदात्मनः को विशेषो यत्तं रक्षामि नेतरम् ॥ ९६ ॥
तद्दुःखेन न मे बाधेत्यतो[3] यदि न रक्ष्यते[4] ।
नागामिकायदुःखान्मे[5] बाधा तत्केन रक्ष्यते[4] ॥ ९७ ॥
अहमेव[6] तदापीति मिथ्येयं परिकल्पना ।
अन्य एव मृतो यस्मादन्य एव प्रजायते ॥ ९८ ॥
यदि यस्यैव[7] तद्दुःखं[8] रक्ष्यं[9] तस्यैव तन्मतम्[10] ।
पाददुःखं न हस्तस्य कस्मात्तत्तेन रक्ष्यते ॥ ९९ ॥
अयुक्तमपि चेदेतदहंकारात्प्रवर्तते ।
यदयुक्तं निवर्त्यं तत्स्वमन्यच्च[11] यथाबलम् ॥ १०० ॥
संतानः[12] समुदायश्च पङ्क्तिसेनादिवन्मृषा[13] ।
यस्य दुःखं स नास्त्यस्मात्कस्य तत्स्वं भविष्यति ॥ १०१ ॥
अस्वामिकानि दुःखानि सर्वाण्येवाविशेषतः ।
दुःखत्वादेव वार्याणि नियमस्तत्र किं कृतः ॥ १०२ ॥
दुःखं कस्मान्निवार्यं चेत्सर्वेषामविवादतः ।
वार्यं चेत्सर्वमप्येवं न चेदात्मापि सर्ववत् ॥ १०३ ॥
कृपया बहुदुःखं चेत्कस्मादुत्पद्यते बलात् ।
जगद्दुःखं निरूप्येदं कृपादुःखं कथं बहु ॥ १०४ ॥
बहूनामेकदुःखेन यदि दुःखं विगच्छति ।
उत्पाद्यमेव[14] तद्दुःखं सदयेन परात्मनोः ॥ १०५ ॥

---

1) L²., M. °न्यदुःखं — 2) M., L². — L¹. सुखप्रियं — 3) M. बाध्येत्ततो — 4) L². रक्षसि — 5) M., L². — L¹. °खात्मे — 6) L². भवामीति — 7) L². पश्यैव — 8) L². यदुःखं — 9) L¹. нѣтъ. — 10) M. मृतम् — 11) L². °न्यद्वा — 12) L¹. संतनः — L². संतान° — 13) M. °षाः — 14) L²., M. — L¹. उत्पाद°.

अतः सुपुष्पचन्द्रेण जानतापि नृपापदम् ।
आत्मदुःखं न निहतं बहूनां दुःखिनां व्ययात् ॥ १०६ ॥
एवं भावितसंतानाः परदुःखसमप्रियाः ।
अवीचिमवगाहन्ते हंसाः पद्मवनं यथा ॥ १०७ ॥
मुच्यमानेषु सत्त्वेषु ये ते प्रामोद्यसागराः[1] ।
तैरेव ननु [2]पर्याप्तमोक्षेणारसिकेन किम् ॥ १०८ ॥
अतः परार्थं कृत्वापि न मदो न च विस्मयः ।
न विपाकफलाकाङ्क्षा परार्थैकान्ततृष्णया ॥ १०९ ॥
तस्माद्यथान्तशो ऽवर्णादात्मानं गोपयाम्यहम्[3] ।
रक्षाचित्तं [4]दयाचित्तं करोम्येवं परेष्वपि ॥ ११० ॥
अभ्यासादन्यदीयेषु शुक्रशोणितबिन्दुषु ।
भवत्यहमिति ज्ञानमसत्यपि हि वस्तुनि ॥ १११ ॥
तथा कायो ऽन्यदीयो ऽपि किमात्मेति न गृह्यते ।
परत्वं तु स्वकायस्य स्थितमेव न दुष्करम् ॥ ११२ ॥
ज्ञात्वा सदोषमात्मानं परानपि गुणोदधीन् ।
आत्मभावपरित्यागं [5]परादानं च भावयेत् ॥ ११३ ॥
कायस्यावयवत्वेन यथाभीष्टाः करादयः ।
जगतो ऽवयवत्वेन तथा कस्मान्न देहिनः ॥ ११४ ॥
यथात्मबुद्धिरभ्यासात्स्वकाये ऽस्मिन्निरात्मके ।
परेष्वपि तथात्मत्वं किमभ्यासान्न जायते ॥ ११५ ॥
एवं परार्थं कृत्वापि न मदो न च विस्मयः ।
आत्मानं भोजयित्वैव [6]फलाशा न च जायते ॥ ११६ ॥
तस्माद्यथार्तिशोकादेरात्मानं गोप्तुमिच्छसि ।
रक्षाचित्तं दयाचित्तं जगत्यभ्यस्यतां तथा ॥ ११७ ॥
अध्यतिष्ठदतो नाथः स्वनामाप्यवलोकितः ।
[7]पर्षच्छारद्यभयमप्यपनेतुं जनस्य हि ॥ ११८ ॥
दुष्करान्न निवर्तेत यस्मादभ्यासशक्तितः ।

---

1) L²., M. — L¹. प्रामाद्य° — 2) L². पर्याप्तं — 3) M., L². — L¹. °प्ययया° — 4) M. दयचित्तं — 5) L¹. परानञ्च — 6) L¹. फलासा — 7) M. पर्षत्श° — L². पर्षत्सा°.

यस्यैव श्रावणात्त्रासस्तेनैव न विना रतिः ॥ ११९ ॥
आत्मानं चापरांश्चैव यः शीघ्रं त्रातुमिच्छति ।
स चरेत्परमं गुह्यं परात्मपरिवर्तनम् ॥ १२० ॥
यस्मिन्नात्मन्यतिस्नेहादल्पादपि भयाद्भयम् ।
न द्विषेत्कस्तमात्मानं शत्रुवद्यो भयावहः ॥ १२१ ॥
यो मान्द्यक्षुत्पिपासादिप्रतीकारचिकीर्षया [1] ।
पक्षिमत्स्यमृगान्हन्ति परिपन्थं च तिष्ठति ॥ १२२ ॥
यो लाभसत्क्रियाहेतोः पितरावपि मारयेत् ।
रत्नत्रयस्वमादद्याद्येनावीचीन्धनो भवेत् ॥ १२३ ॥
कः पण्डितस्तमात्मानमिच्छेद्रक्षेत्प्रपूजयेत् ।
न पश्येच्छत्रुवच्चैनं कश्चैनं प्रतिमानयेत् ॥ १२४ ॥
यदि दास्यामि किं भोक्ष्य [2] इत्यात्मार्थे पिशाचता ।
[3] यदि भोक्ष्ये किं ददामीति परार्थे देवराजता ॥ १२५ ॥
आत्मार्थं पीडयित्वान्यं नरकादिषु पच्यते ।
आत्मानं पीडयित्वा तु परार्थं सर्वसंपदः ॥ १२६ ॥
दुर्गतिर्नीचता मौर्ख्यं ययैवात्मोन्नतीच्छया ।
[4] तामेवान्यत्र संक्राम्य सुगतिः सत्कृतिर्मतिः ॥ १२७ ॥
आत्मार्थं परमाज्ञाप्य [5] दासत्वाद्यनुभूयते [6] ।
[7] परार्थं त्वेनमाज्ञाप्य स्वामित्वाद्यनुभूयते ॥ १२८ ॥
ये केचिद्दुःखिता लोके सर्वे ते स्वसुखेच्छया ।
ये केचित्सुखिता लोके सर्वे ते ऽन्यसुखेच्छया ॥ १२९ ॥
बहुना वा किमुक्तेन [8] दृश्यतामिदमन्तरम् ।
स्वार्थार्थिनश्च बालस्य [9] मुनेश्चान्यार्थकारिणः ॥ १३० ॥
न नाम साध्यं बुद्धत्वं संसारे ऽपि कुतः सुखम् ।
स्वसुखस्यान्यदुःखेन परिवर्तमकुर्वतः ॥ १३१ ॥
आस्तां तावत्परो लोको दृष्टो ऽप्यर्थो न सिध्यति ।

---

1) L². °पत्रीकार° — 2) M. भोक्त — 3) M. भोक्ष्ये चेत् — L¹. द्वयं — 4) L²., M. — L¹. तामेवात्र — 5) M. परामा° — 6) L¹.°त्वादनु° — 7) M. परार्थं तु स्वमा° — L². परार्थत्वेनमा° — 8) L¹. दृश्यताकिमि° — 9) L¹. बालश्चस्यमुश्चा°.

भृत्यस्याकुर्वतः[1] कर्म स्वामिनो ऽददतो भृतिम् ॥ १३२ ॥

त्यक्त्वान्योन्यसुखोत्पादं[2] दृष्टादृष्टसुखोत्सवम् ।
अन्योन्यदुःखनाद्घोरं दुःखं गृह्णन्ति[3] मोहिताः ॥ १३३ ॥

उपद्रवा ये च भवन्ति लोके यावन्ति दुःखानि भयानि चैव ।
सर्वाणि तान्यात्मपरिग्रहेण तत्किं ममानेन परिग्रहेण ॥ १३४ ॥

आत्मानमपरित्यज्य दुःखं त्यक्तुं न शक्यते[4] ।
यथाग्निमपरित्यज्य दाहं[5] त्यक्तुं न शक्यते ॥ १३५ ॥

तस्मात्स्वदुःखशान्त्यर्थं परदुःखशमाय च ।
ददाम्यन्येभ्य आत्मानं परान् गृह्णामि चात्मवत् ॥ १३६ ॥

अन्यसंबद्धमस्मीति[6] निश्चयं कुरु हे मनः ।
सर्वसत्त्वार्थमुत्सृज्य नान्यच्चिन्त्यं[7] त्वयाधुना ॥ १३७ ॥

न युक्तं[8] स्वार्थदृष्ट्यादि तदीयैश्चक्षुरादिभिः ।
न युक्तं स्यन्दितुं स्वार्थमन्यदीयैः करादिभिः ॥ १३८ ॥

तेन सत्त्वपरो भूत्वा काये ऽस्मिन्यद्यदीक्षसे[9] ।
तत्तदेवापहृत्यास्मात्परेभ्यो हितमाचर ॥ १३९ ॥

हीनादिष्वात्मतां कृत्वा परत्वमपि चात्मनि ।
भावयेर्ष्यां च मानं च निर्विकल्पेन चेतसा ॥ १४० ॥

एष सत्क्रियते नाहं लाभी नाहमयं यथा ।
स्तूयतेऽयमहं निन्द्यो दुःखितो ऽहमयं सुखी ॥ १४१ ॥

अहं करोमि कर्माणि तिष्ठत्येष तु सुस्थितः ।
अयं किल महाँल्लोके नीचोऽहं किल निर्गुणः ॥ १४२ ॥

किं निर्गुणेन कर्तव्यं सर्वस्यात्मा[10] गुणान्वितः ।
सन्ति ते येष्वहं[11] नीचः सन्ति ते येष्वहं[12] वरः ॥ १४३ ॥

शीलदृष्टिविपत्त्यादि[13]क्लेशशक्त्या[14] न मद्वशात् ।
चिकित्स्योऽहं[15] यथाशक्ति[16] पीडाप्यङ्गीकृता मया ॥ १४४ ॥

अथाहमचिकित्स्यो[17] ऽस्य कस्मान्मामवमन्यते ।

---

1) L². भृतस्या° — 2) L²., M. — L¹. °न्योन्यं सुखोत्पादं — 3) M. गृह्यन्ति — 4) M. पार्यते — 5) L²., M. दाहस्त्य° — 6) L²., M. °बन्ध° — 7) M., L². नान्यं — 8) L². °दृष्ट्वा° — 9) M. °दीक्ष्यते — L². कायो, °क्ष्यसे — 10) M. सर्वस्यात्मगुणान्वितः — 11) M., L². °यं — 12) M. °यं — 13) M. °दृष्टिर्वि° — 14) M. °शक्त्यो — 15) L². °त्स्यो — 16) M. यथाशक्त्या — 17) L². °त्स्यो.

किं ममैतद्गुणैः कृत्यमात्मा तु [1] गुणवानयम् [2] ॥ १४५ ॥
दुर्गतिव्याडवक्त्रस्थेनैवास्य करुणा जने ।
अपरं [3] गुणमानेन पण्डितान्विजिगीषते ॥ १४६ ॥
सममात्मानमालोक्य [4] यतः [5] स्वाधिक्यवृद्धये ।
कलहेनापि संसाध्यं लाभसत्कारमात्मनः ॥ १४७ ॥
अपि सर्वत्र मे लोके भवेयुः [6] प्रकटा गुणाः ।
अपि नाम गुणा ये ऽस्य [7] न श्रोष्यन्त्यपि केचन ॥ १४८ ॥
छाद्येरन्नपि मे दोषाः स्यान्मे पूजास्य नो भवेत् ।
सुलब्धा अद्य मे लाभाः पूजितो ऽहमयं न तु ॥ १४९ ॥
[8] पश्यामो मुदितास्तावच्चिरादेनं खलीकृतं ।
हास्यं जनस्य सर्वस्य निन्द्यमानमितस्ततः [9] ॥ १५० ॥
अस्यापि हि वराकस्य स्पर्धा किल मया सह ।
किमस्य श्रुतमेतावत्प्रज्ञारूपं कुलं धनं ॥ १५१ ॥
एवमात्मगुणाञ्छ्रुत्वा कीर्त्यमानानितस्ततः ।
[10] संजातपुलको हृष्टः परिभोक्ष्ये सुखोत्सवम् ॥ १५२ ॥
यद्यप्यस्य भवेल्लाभो ग्राह्यो ऽस्माभिरसौ बलात् ।
दत्त्वास्मै यापनामात्रमस्मत्कर्म करोति चेत् ॥ १५३ ॥
सुखाच्च च्यावनीयो ऽयं योज्यो ऽस्मद्व्यथया सदा ।
अनेन शतशः सर्वे [11] संसारव्यथिता वयम् [12] ॥ १५४ ॥
अप्रमेया गताः कल्पाः स्वार्थं जिज्ञासतस्तव [13] ।
श्रमेण महतानेन दुःखमेव त्वयार्जितम् ॥ १५५ ॥
मद्विज्ञप्त्या तथात्रापि प्रवर्तस्वाविचारतः [14] ।
[15] हृदयस्येतद्गुणान्पश्चाद्भूतं हि वचनं मुनेः ॥ १५६ ॥
अभविष्यदिदं कर्म कृतं पूर्वं यदि त्वया ।
[16] बौद्धं संपत्सुखं मुक्त्वा नाभविष्यदियं दशा ॥ १५७ ॥
तस्माद्यथान्यदीयेषु शुक्रशोणितबिन्दुषु ।

---

1) L²., M. °त्मार्थं — 2) L¹. गुणानयं — 3) M. गुणवानेन — 4) L¹. °मालोक्य तत् विद्यवृद्धये — L². °लोकयत स्वोधिकवृद्धये — 5) M. स्वाविक्यसि° — 6) L¹. भवे — 7) L². नस्य — 8) M. पश्चात्म — 9) L²., M. — L¹. निन्दमान° — 10) L²., M. — L¹. संजत° — 11) L². पूर्वं — 12) L¹. व्ययं — 13) L². स्वार्थजि° — M. जिज्ञाश° — 14) M. प्रवर्त्तः — 15) M. हृदयस्यैवं — L². °से — 16) L¹. बौद्धम्पदंन्सु°.

चक्रर्थं त्वमहंकारं तथान्येष्वपि भावय ॥ १५८ ॥
अन्यदीयश्वरो भूत्वा काये ऽस्मिन्यद्यदीत्तसे[1]।
तत्तदेवापहृत्यर्थं परेभ्यो हितमाचर ॥ १५९ ॥
अयं[2] सुस्थः परो दुःस्थो नीचैरन्यो ऽयमुच्चकैः।
परः करोत्ययं नेति कुरुष्वेर्ष्यां त्वमात्मनि ॥ १६० ॥
सुखाच्च च्यावयात्मानं परदुःखे नियोजय।
कदायं किं करोतीति[3] छलमस्य निरूपय ॥ १६१ ॥
अन्येनापि कृतं दोषं पातयास्यैव मस्तके।
अल्पमप्यस्य दोषं च प्रकाशय महामुनेः ॥ १६२ ॥
[4]अन्याधिकयशोवादैर्यशो ऽस्य मलिनीकुरु।
निकृष्टदासवच्चैनं सत्त्वकार्येषु[*] वाहय ॥ १६३ ॥
नागन्तुकगुणांशेन स्तुत्यो दोषमयो ह्ययं।
यथा कश्चिन्न जानीयाद्गुणमस्य तथा कुरु ॥ १६४ ॥
संक्षेपाद्यद्यदात्मार्थे परेष्वपकृतं त्वया।
तत्तदात्मनि सत्त्वार्थे व्यसनं विनिपातय ॥ १६५ ॥
नैवोत्साहोऽस्य दातव्यो येनायं मुखरो भवेत्।
स्थाप्यो नवबधूवृत्तौ ह्रीतो भीतो ऽथ संवृतः ॥ १६६ ॥
एवं कुरुष्व तिष्ठैवं न कर्तव्यमिदं त्वया।
एवमेव वशः कार्यो निग्राह्यस्तदतिक्रमे[5] ॥ १६७ ॥
अथैवमुच्यमाने ऽपि चित्तं नेदं करिष्यसि।
त्वामेव निग्रहीष्यामि सर्वदोषास्त्वदाश्रिताः ॥ १६८ ॥
क्व यास्यसि मया दृष्टः सर्वदर्पान्निहन्मि ते।
अन्योऽसौ पूर्वकः कालस्त्वया यत्रास्मि नाशितः[6] ॥ १६९ ॥
अद्याप्यस्ति मम स्वार्थ इत्याशां त्यज सांप्रतम्।
त्वं विक्रीतो मयान्येषु बहुखेदमचिन्तयन् ॥ १७० ॥
[7]त्वां सत्त्वेषु न दास्यामि यदि नाम प्रमोदतः।

---

1) L¹., L²., M. °द्यसे — L². °हृत्यस्मात्प° — M. °हृत्य त्वं — 2) L¹. स्वस्थः — 3) M. फल° — 4) L². °यस्यैवादैर्य° — 5) L². °स्तिक्रमे — 6) M. नाश्रितः — 7) M. सत्वेभ्यो न ददामि त्वां यदि नाम प्रमादतः.

*) L¹. отсюда пропускъ.

त्वं मां नरकपालेषु प्रदास्यसि न संशयः ॥ १७१ ॥
एवं चानेकधा दत्त्वा त्वयाहं व्यथितश्चिरम् ।
निहन्मि स्वार्थचेटं त्वां[1] तानि वैराण्यनुस्मरन् ॥ १७२ ॥
न कर्तव्यात्मनि प्रीतिर्यद्यात्मप्रीतिरस्ति ते ।
यद्यात्मा रक्षितव्यो ऽयं रक्षितव्यो न युज्यते ॥ १७३ ॥
यथा यथास्य कायस्य क्रियते परिपालनम् ।
सुकुमारतरो भूत्वा[2] पतत्येव तथा तथा ॥ १७४ ॥
अस्यैवं पतितस्यापि सर्वापीयं वसुंधरा ।
नालं पूरयितुं वाञ्छां तत्को ऽस्येच्छां करिष्यति ॥ १७५ ॥
अशक्यमिच्छतः क्लेश आशाभङ्गश्च[3] जायते ।
निराशो यस्तु सर्वत्र तस्य संपदजीर्णिका ॥ १७६ ॥
तस्मान्न प्रसरो देयः कायस्येच्छाभिवृद्धये[4] ।
भद्रकं नाम तद्वस्तु यदिष्टत्वान्न गृह्यते ॥ १७७ ॥
भस्मनिष्ठावसानेयं निश्चेष्टान्येन चाल्यते ।
अशुचिप्रतिमा घोरा कस्मादत्र ममाग्रहः ॥ १७८ ॥
किं ममानेन यन्त्रेण जीविना[5] वा मृतेन वा ।
लोष्टादेः को विशेषो ऽस्य हाहंकारं न नश्यसि ॥ १७९ ॥
शरीरपक्षपातेन वृथा दुःखमुपार्ज्यते ।
किमस्य काष्ठतुल्यस्य द्वेषेणानुनयेन वा ॥ १८० ॥
मया वा पालितस्यैवं गृध्राद्यैर्भक्षितस्य वा ।
न च स्नेहो[*] न च द्वेषस्तत्र स्नेहं करोमि[6] किम् ॥ १८१ ॥
रोषो यस्य खलीकारात्तोषो यस्य च पूजया ।
स एव चेन्न जानाति श्रमः कस्य कृतेन मे ॥ १८२ ॥
इमं ये कायमिच्छन्ति तेऽपि मे सुहृदः किल ।
सर्वे स्वकायमिच्छन्ति तेऽपि कस्मान्न मे प्रियाः ॥ १८३ ॥
तस्मान्मयानपेक्षेण कायस्त्यक्तो जगद्धिते ।
अतो ऽयं बहुदोषो ऽपि धार्यते कर्मभाण्डवत् ॥ १८४ ॥
तेनालं लोकचरितैः पण्डिताननुयाम्यहम् ।

---

1) L². तत्वां — M. निहन्मि त्वां स्वार्थचेट — 2) L². पतत्वेव — 3) M. °भङ्ग च — 4) M. को प° --- विवृद्धये — 5) L²., M. °ता — 6) M. °ति. — *) L¹. пропускъ конченъ.

अप्रमादकथां स्मृत्वा स्त्यानमिद्धं निवारयन् ॥ १८५ ॥
तस्मादावरणं हन्तुं समाधानं करोम्यहम् ।
विमार्गाच्चित्तमाकृष्य स्वालम्बननिरन्तरम् ॥ १८६ ॥

बोधिचर्यावतारे ध्यानपारमिता अष्टमः[1] परिच्छेदः ॥ ॥

इमं परिकरं सर्वं प्रज्ञार्थं हि मुनिर्जगौ ।
तस्मादुत्पादयेत्प्रज्ञां दुःखनिर्वृतिकाङ्क्षया ॥ १ ॥
संवृतिः परमार्थश्च सत्यद्वयमिदं मतम् ।
बुद्धेरगोचरस्तत्त्वं[2] बुद्धिः संवृतिरुच्यते ॥ २ ॥
तत्र लोको द्विधा दृष्टो योगी प्राकृतकस्तथा ।
तत्र प्राकृतको लोको[3] योगिलोकेन बाध्यते ॥ ३ ॥
बाध्यन्ते धीविशेषेण योगिनोऽप्युत्तरोत्तरैः ।
दृष्टान्तेनोभयेष्टेन कार्यार्थमविचारतः ॥ ४ ॥
लोकेन भावा दृश्यन्ते कल्प्यन्ते चापि तत्त्वतः ।
ननु मायावदित्यत्र विवादो योगिलोकयोः ॥ ५ ॥
प्रत्यक्षमपि रूपादिप्रसिद्ध्या न प्रमाणतः ।
अशुच्यादिषु[4] शुच्यादिप्रसिद्धिरिव[5] सा मृषा ॥ ६ ॥
लोकावतारणार्थं च भावा नाथेन देशिताः ।
तत्त्वतः क्षणिका नैते संवृत्या चेद्विरुध्यते ॥ ७ ॥
न दोषो[6] योगिसंवृत्या लोकात्ते तत्त्वदर्शिनः ।
अन्यथा लोकबाधा स्यादशुचिस्त्रीनिरूपणे ॥ ८ ॥
मायोपमाज्जिनात्पुण्यं सद्भावे ऽपि कथं यथा ।
यदि मायोपमः सत्त्वः किं पुनर्जायते मृतः ॥ ९ ॥
यावत्प्रत्ययसामग्री तावन्मायापि वर्तते ।
दीर्घसंतानमात्रेण कथं सत्त्वो[7]ऽस्ति सत्यतः ॥ १० ॥
मायापुरुषघातादौ चित्ताभावान्न पापकम् ।
चित्तमायासमेते तु पापपुण्यसमुद्भवः ॥ ११ ॥

1) M. °ता परिच्छेदो ऽष्टमः — 2) $L^2$. बुद्धि° — 3) M. योगी° — 4) $L^2$. अस° — 5) $L^2$. स° — 6) M. योगी - - - °कान्ते — 7) $L^2$. सत्यो.

मन्त्रादीनामसामर्थ्यान्न माया चित्तसंभवः ।
सापि नानाविधा माया नानाप्रत्ययसंभवा ॥ १२ ॥
नैकस्य सर्वसामर्थ्यं प्रत्ययस्यास्ति कुत्रचित् ।
निर्वृतः[1] परमार्थेन संवृत्या यदि संसरेत् ॥ १३ ॥
बुद्धोऽपि संसरेदेवं ततः किं बोधिचर्यया ।
प्रत्ययानामनुच्छेदे मायाप्युच्छिद्यते न हि ॥ १४ ॥
प्रत्ययानां तु विच्छेदात्संवृत्यापि न संभवः ।
यदा न भ्रान्तिरप्यस्ति माया केनो[2]पलभ्यते ॥ १५ ॥
यदा मायैव तेनास्ति तदा किमुपलभ्यते ।
चित्तस्यैव स आकारो यद्यन्योऽस्त्येव[3] तत्वतः ॥ १६ ॥
चित्तमेव यदा माया तदा किं केन दृश्यते ।
उक्तं[4] च लोकनाथेन चित्तं चित्तं न पश्यति ॥ १७ ॥
न छिनत्ति यथात्मानमसिधारा तथा मनः ।
आत्मभावं यथा दीपः संप्रकाशयतीति चेत् ॥ १८ ॥
नैव प्रकाश्यते दीपो यस्मान्न तमसावृतः ।
न हि स्फटिकवन्नीलं नीलत्वेऽन्यमपेक्षते[5] ॥ १९ ॥
तदा[6] किंचित्परापेक्ष[7]मनपेक्षं[7] च दृश्यते ।
अनीलत्वेन तन्नीलं नील[8]हेतुर्यथेक्ष्यते ॥ २० ॥
नीलमेव[9] हि को[10] नीलं कुर्यादात्मानमात्मना ।
अनीलत्वेन[11] तन्नीलं कुर्यादात्मानमात्मना ॥ २१ ॥
दीपः प्रकाशत इति ज्ञात्वा ज्ञानेन कथ्यते ।
बुद्धिः प्रकाशत इति[12] ज्ञात्वा केनचिदुच्यते ॥ २२ ॥
प्रकाशा वाप्रकाशा[13] वा यदा दृष्टा न केनचित् ।
बन्ध्यादुहितृलीलेव कथ्यमानापि सा मुधा ॥ २३ ॥
यदि नास्ति स्वसंवित्तिर्विज्ञानं स्मर्यते कथम् ।
अन्यानुभूते[14] संबन्धात्स्मृतिराखुविषं यथा ॥ २४ ॥

---

1) L². निर्वृतिः — 2) L². लोकेनो° — 3) L². नास्ति तत्वतः — 4) L¹. стоитъ ला и зачеркнуто. — 5) L². ऽन्यदपेक्ष्यते — 6) L²., M. तथा हि — 7) M. °क्ष्य° — 8) M. нѣтъ до конца строфы. — 9) M. начало выпущено. — 10) M. вм. d въ 20. — 11) M. вся строка выпущена. — 12) L². ज्ञात्वेदं केन कथ्यते — 13) L¹. अप्रकाशा — 14) M. सम्बन्धा — L². °भूतसं°.

प्रत्ययान्तरयुक्तस्य दर्शनात्स्वं प्रकाशते[1]।
सिद्धाञ्जनविधे[2] दृष्टो घटो[3] नैवाञ्जनं भवेत् ॥ २५ ॥
यथा दृष्टं श्रुतं ज्ञातं नैवेह[4] प्रतिषिध्यते।
सत्यतः कल्पना त्वत्र दुःखहेतुर्निवार्यते ॥ २६ ॥
चित्तादन्या न माया चेन्नाप्यनन्येति कल्प्यते।
वस्तु चेत्सा कथं नान्यानन्या चेन्नास्ति वस्तुतः ॥ २७ ॥
असत्यपि यथा माया दृश्या द्रष्टृ[5] तथा मनः।
वस्त्वाश्रयश्चेत्संसारः सोऽन्यथाकाशवद्भवेत् ॥ २८ ॥
वस्त्वाश्रयेणाभावस्य क्रियावत्त्वं कथं भवेत्।[6]
असत्सहायमेकं हि चित्तमापद्यते तव ॥ २९ ॥
ग्राह्यमुक्तं यदा चित्तं तदा सर्वे तथागताः।
एवं च को गुणो लब्धश्चित्तमात्रेऽपि कल्पिते ॥ ३० ॥
मायोपमत्वेऽपि कथं ज्ञाते क्लेशो निवर्तते।
यदा मायास्त्रियां रागस्तत्कर्तुरपि जायते ॥ ३१ ॥
अप्रहीणा हि तत्कर्तुर्ज्ञेयसंक्लेशवासना।
तद्दृष्टिकाले तस्यातो दुर्बला शून्यवासना ॥ ३२ ॥
शून्यतावासनाभावाद्धीयते[7] भाववासना।
किंचिन्नास्तीति चाभ्यासात्सापि पश्चात्प्रहीयते ॥ ३३ ॥
यदा न लभ्यते भावो यो नास्तीति प्रकल्प्यते।
तदा निराश्रयो भावः कथं तिष्ठेन्मतेः पुरः ॥ ३४ ॥
यदा न भावो नाभावो मतेः संतिष्ठते पुरः।
तदान्यगत्यभावेन निरालम्बा प्रशाम्यति ॥ ३५ ॥
चिन्तामणिः[8] कल्पतरुर्यथेच्छापरिपूरणः।
विनेयप्रणिधानाभ्यां जिनबिम्बं तथेक्ष्यते ॥ ३६ ॥
यथा गारुडिकः[9] स्तम्भं साधयित्वा विनश्यति।
स तस्मिंश्चिरनष्टेऽपि विषादीनुपशामयेत् ॥ ३७ ॥
बोधिचर्यानुरूप्येण[10] जिनस्तम्भोऽपि साधितः।

---

1) M. प्रकाश्यते — 2) M. सिद्धाञ्जनविधिर्दृ° — L². °विधिं — 3) L². घटेनैव — 4) L². दृष्टश्रुतं ज्ञातं — M. प्रतिसिध्यते — 5) M. — L¹. दृष्टृ — L². दृष्टं — 6) M. этотъ стихъ выпущенъ. 7) M., L². धाना° — 8) L¹. °णि — 9) M. °ह्रिकः — 10) L²., M. °पेण.

करोति सर्वकार्याणि बोधिसत्त्वेऽपि निर्वृते ॥ ३८ ॥
अचित्तके कृता पूजा कथं फलवती भवेत् ।
तुल्यैव पठ्यते यस्मात्तिष्ठतो निर्वृतस्य वा ॥ ३९ ॥
आगमाच्च फलं तत्र संवृत्या तत्त्वतोऽपि वा ।
सत्यबुद्धे कृता पूजा सफलेति कथं यथा ॥ ४० ॥
सत्यदर्शनतो मुक्तिः शून्यतादर्शनेन किम् ।
न विनानेन मार्गेण बोधिरित्यागमो[1] यतः ॥ ४१ ॥
नन्वसिद्धं महायानं कथं सिद्धस्त्वदागमः[2] ।
यस्मादुभयसिद्धोऽसौ न सिद्धोऽसौ तवादितः ॥ ४२ ॥
[3]यत्प्रत्यया च तत्रास्था महायानेऽपि तां कुरु ।
अन्योभयेष्टसत्यत्वे[4] वेदादेरपि सत्यता ॥ ४३ ॥
सविवादं महायानमिति चेदागमं त्यज ।
तीर्थिकैः सविवादत्वात्स्वैः परैश्चागमान्तरम् ॥ ४४ ॥
शासनं भिक्षुतामूलं भिक्षुतैव च दुःस्थिता ।
सावलम्बनचित्तानां निर्वाणमपि दुःस्थितम् ॥ ४५ ॥
क्लेशप्रहाणान्मुक्तिश्चेत्तदनन्तरमस्तु सा ।
दृष्टं च तेषु सामर्थ्यमक्लेशस्यापि कर्मणः ॥ ४६ ॥
तृष्णा तावदुपादानं नास्ति चेत्संप्रधार्यते[5] ।
किमक्लिष्टापि तृष्णैषां नास्ति संमोहवत्सती[6] ॥ ४७ ॥
वेदनाप्रत्यया तृष्णा वेदनैषां च विद्यते ।
सालम्बनेन चित्तेन स्थातव्यं यत्र तत्र वा ॥ ४८ ॥
विना शून्यतया चित्तं बद्धमुत्पद्यते पुनः ।
यथासंज्ञिसमापत्तौ भावयेत्तेन शून्यताम् ॥ ४९ ॥
यत्सूत्रेऽवतरेद्वाक्यं तच्चेद्बुद्धोक्तमिष्यते ।
महायानं भवेत्सूत्रैः प्रायस्तुल्यं[7] न किं मतम् ॥ ५० ॥
एकेनागम्यमानेन सकलं यदि दोषवत् ।
एकेन सूत्रतुल्येन किं न सर्वं जिनोदितम् ॥ ५१ ॥

---

1) M. न च — 2) L². °स्तदागमः — 3) M. यत्प्रत्ययाच्च — 4) L². °सत्यार्थत्वे — 5) M. °वार्यते — L². °धार्यतं — 6) L². °वत्यपि и поправлено какъ въ текстѣ. — 7) L². °ल्या.

…टैनैव — 4) L². ह-
…тихъ выпущенъ.

महाकाश्यपमुख्यैश्च[1] यद्वाक्यं[2] नात्रगाह्यते ।
तन्महायानवबुद्धत्वाद्[3]ग्राह्यं कः करिष्यति ॥ ५२ ॥
[4]शक्तित्रासात्त्वनिर्मुक्त्या संसारे सिध्यति स्थितिः ।
मोहेन दुःखिनामर्थे शून्यताया इदं फलम् ॥ ५३ ॥
तदेवं शून्यतापक्षे दूषणं नोपपद्यते ।
तस्मान्निर्विचिकित्सेन भावनीयैव शून्यता ॥ ५४ ॥
क्लेशज्ञेयावृतितमः प्रतिपक्षो[5] हि शून्यता ।
शीघ्रं सर्वज्ञताकामो न भावयति तां कथम् ॥ ५५ ॥
यद्दुःखजननं वस्तुत्रासस्तस्मात्प्रजायताम् ।
शून्यता दुःखशमनी ततः किं जायते भयम् ॥ ५६ ॥
यतस्ततो वास्तु[6] भयं यद्यहं नाम किंचन ।
अहमेव न किंचिच्चेद्भयं कस्य भविष्यति ॥ ५७ ॥
दन्तकेशनखा नाहं[7] नास्थि नाप्यस्मि शोणितम् ।
न सिंहाणं[8] न च श्लेष्मा न पूयं लसिकापि वा[9] ॥ ५८ ॥
नाहं वसा[10] न च स्वेदो न मेदो ऽन्त्राणि नाप्यहम् ।
न चाहमन्त्रनिर्गुण्डी[11] गूथमूत्रमहं न च ॥ ५९ ॥
[12]नाहं मांसं न च स्नायुर्नोष्मा वायुरहं न च ।
न च छिद्राण्यहं नापि षड्विज्ञानानि सर्वदा[13] ॥ ६० ॥
शब्दज्ञानं यदि तदा[14] शब्दो[15] गृह्यते सर्वदा ।
ज्ञेयं विना तु किं वेत्ति येन ज्ञानं[16] निरूच्यते ॥ ६१ ॥
अज्ञानानां[17] यदि ज्ञानं काष्ठं ज्ञानं प्रसज्यते ।
तेनासंनिहितज्ञेयं[18] ज्ञानं नास्तीति निश्चयः ॥ ६२ ॥
तदेवरूपं जानाति तदा किं न शृणोत्यपि ।
शब्दस्यासंनिधानाच्चेत्ततस्तज्ज्ञानमप्यसत् ॥ ६३ ॥

1) $L^2$. °प्रमुखै यद्वा° — 2) $L^2$. न विग्राह्यते — 3) $L^1$. °नबुद्ध° — 4) $L^1$. सक्ति° — $L^2$. °त्रासातु — 5) M. °र्त्तं — 6) $L^1$., M. — $L^2$. поправлено वस्तु — 7) M. नास्ति — 8) $L^2$. सिंहानं — M. सिंघाणं — 9) $L^2$. न च — 10) M. वशा — 11) M. °न्त्रनिर्गुण्डी — 12) $L^2$. नाहं मांसं न चर्माहं न च स्नायु नोष्मा वायुरहन्न च । — M. न च स्नायु выпущено. — 13) $L^2$., M. सर्वथा — 14) M. सदा — 15) $L^2$., M. गृह्येत — 16) $L^2$., M. निरूध्यते — 17) $L^2$., M. अज्ञाननं — 18) $L^2$. °निहितं ज्ञेयं.

शब्दग्रहणाद्रूपं यत्तद्रूपग्रहणं[1] कथम्।
एकः पिता च पुत्रश्च कल्प्यते ननु[2] तद्वतः ॥ ६४ ॥
सत्त्वं[3] रजस्तमो वापि न पुत्रो न पिता यतः।
शब्दग्रहणयुक्तस्तु स्वभावस्तस्य नेष्यते ॥ ६५ ॥
तदेवान्येन रूपेण[4] नडवंशो ऽप्यशाश्वतः।
स[5] एवान्यस्वभावश्चेदपूर्वेयं[6] तदेकता ॥ ६६ ॥
अन्यद्रूपमसत्यं[7] चेन्निजं तद्रूपमुच्यताम्।
ज्ञानता चेत्ततः सर्वं पुंसामैक्यं प्रसज्यते ॥ ६७ ॥
चेतनाचेतने[8] चैक्यं तयोर्येनास्तिता समा।
विशेषश्च यदा मिथ्या कः[9] सादृश्याश्रयस्तदा ॥ ६८ ॥
अचेतनश्च नैवाहमचैतन्यात्[10]पटादिवत्।
अथ[11] ज्ञश्चेतनायोगादज्ञो[12] नष्टः प्रसज्यते ॥ ६९ ॥
अथाविकृत एवात्मा चैतन्येनास्य किं कृतम्।
अज्ञस्य निष्क्रियस्यैवमाकाशस्यात्मता कृता ॥ ७० ॥
न कर्मफलसंबन्धो युक्तश्चेदात्मना विना।
कर्म कृत्वा विनष्टे हि फलं कस्य भविष्यति ॥ ७१ ॥
द्वयोरप्यावयोः सिद्धे[13] भिन्नाधारे क्रियाफले।
निर्व्यापारश्च[14] तत्रात्मेत्यत्र वादो वृथा ननु[15] ॥ ७२ ॥
हेतुमान्फलयोगीति दृश्यते नैष[16] संभवः।
संतानस्यैकमाश्रित्य[17] कर्ता भोक्तेति देशितम् ॥ ७३ ॥
अतीतानागतं चित्तं नाहं तद्धि न विद्यते।
तथोत्पन्नमहं[18] चित्तं नष्टेऽस्मिन्नास्त्यहं पुनः ॥ ७४ ॥
यथैव कदलीस्तम्भो न कश्चिद्भागशः कृतः[19]।
तथाहमप्यसद्भूतो मृग्यमाणो[20] विचारतः ॥ ७५ ॥
यदि सत्त्वो न विद्येत कस्योपरि कृपेति चेत्।

---

1) L². यत्तद्रूपं — M. यत्तद्रूपसंग्रहं — 2) L²., M. न तु — 3) L². सत्वो — 4) L¹., L². °वन्सो — M. °वत्सो — 5) L². एवान्यः — 6) M. °भावश्चेदन्यापूर्वेयमेकता — L¹. °यत्तदे° — 7) L². अन्यद्रू° — 8) L². चेतनात्सचेतन चैकं — 9) L²., M. — L¹. कस्मादृश्याशस्तदा — 10) L¹. °हमाचै° — 11) L². अर्थ° — 12) L². °ज्ञे — 13) L²., M. सिद्ध भिन्ना° — 14) L². निर्व्यापारस्य तत्रात्म्यत्यत्र° и поправка: °त्म्यस्त्य° — 15) L¹. нѣтъ. — 16) L². नैव — 17) L²., M. °नस्यैकमा° — 18) L²., M. अथो° — 19) L¹. °सः — 20) L¹. मृग°.

कार्यार्थमप्युपेतेन[1] यो मोहेन प्रकल्पितः ॥ ७६ ॥
कार्यं कस्य[2] न चेत्सत्त्वः सत्यमीहा तु मोहतः[3] ।
दुःखव्युपशमार्थं तु कार्यमोहेन[4] वार्यते ॥ ७७ ॥
दुःखहेतुरहंकार आत्ममोहात्तु वर्धते ।
ततोऽपि न निवर्त्यश्चेद्वरं नैरात्म्यभावना ॥ ७८ ॥
कायो न पादौ नो[5] जङ्घा नोरू[6] कायः कटिर्न च ।
नोदरं नाप्ययं पृष्ठं[7] नोरू बाहू न चापि सः[8] ॥ ७९ ॥
न हस्तौ नाप्ययं पार्श्वौ न कक्षौ नाङ्गलक्षणः[9] ।
न ग्रीवा न शिरः कायः कायोऽत्र कतरः पुनः ॥ ८० ॥
यदि सर्वेषु[10] कायो ऽयमेकदेशेन[11] वर्तते ।
अङ्गदेशेषु[12] वर्तन्ते स तु कुत्र स्वयं स्थितः ॥ ८१ ॥
सर्वात्मना चेत्सर्वत्र स्थितः कायः करादिषु ।
कायास्तावन्त एव स्युर्यावन्तस्ते करादयः ॥ ८२ ॥
नैवान्तर्न बहिः कायः कथं कायः करादिषु ।
करादिभ्यः पृथग्नास्ति कथं तु खलु विद्यते ॥ ८३ ॥
तन्नास्ति कायो मोहात्तु[13] कायबुद्धिः करादिषु ।
संनिवेशविशेषेण स्थाणौ पुरुषबुद्धिवत् ॥ ॥ ८४ ॥
यावत्प्रत्ययसामग्री तावत्कायः[14] पुमानिव ।
एवं करादौ सा[15] यावत्तावत्कायोऽत्र[16] दृश्यते ॥ ८५ ॥
एवमङ्गुलिपुञ्जत्वात्पादो ऽपि कतरो भवेत् ।
सोऽपि[17] पर्वसमूहत्वात्पर्वापि स्वांशभेदतः ॥ ८६ ॥
अंशानप्यणुभेदेन[18] सो ऽप्यणुर्दिग्विभागतः ।
दिग्विभागो निरंशत्वादाकाशं[19] तेन नास्त्यणुः ॥ ८७ ॥
एवं स्वप्नोपमे रूपे को रज्येत विचक्षणः[20] ।

---

1) L²., M. °मभ्युपेतेन — 2) L². यस्य — 3) L². मोहितः — 4) L². कार्यमोहो न — M. कार्यं मोहो — 5) L¹. еще: प्य и зачеркнуто. — 6) L²., M. °रूः — 7) L². पृष्ठे नोरो — M. पृष्ठो — 8) L². शः — 9) M. नांशलक्षणः — 10) L¹. нѣтъ. — 11) L¹. °देशो न — 12) L²., M. अंशा अंशेषु — 13) L². कार्य° — 14) L². काष्ठ на полѣ поправка: कायः — 15) M. यावत्सा — 16) L¹. еще: स — 17) L². सर्व° — 18) M. अंशामप्य° — 19) M. — L². ऽप्यनिरंसत्वा° — L¹. ऽप्यन सत्वा° — 20) L²., M. विचारकः.

कायश्चैवं यदा नास्ति तदा[1] का स्त्री पुमांश्च कः ॥ ८८ ॥
यद्यस्ति दुःखं तत्तेन प्रहृष्टान्[2] किं न बाधते[3] ।
शोकाद्यार्ताय मृष्टादिसुखं चेत्किं न रोचते ॥ ८९ ॥
बलीयसाभिभूतत्वाद्यदि[4] तन्नानुभूयते ।
वेदनात्वं कथं तस्य यस्य नानुभवात्मता[5] ॥ ९० ॥
अस्ति सूक्ष्मतया दुःखं स्थौल्यमस्य हृतं[6] ननु ।
तुष्टिमात्रापरा चेत्स्यात्तस्मात्साप्यस्य सूक्ष्मता[7] ॥ ९१ ॥
विरुद्धप्रत्ययोत्पत्तौ दुःखस्यानुदयो यदि ।
कल्पनाभिनिवेशो हि वेदनेत्यागतं[8] ननु ॥ ९२ ॥
अत एव विचारोऽयं प्रतिपक्षोऽस्य भाव्यते ।
विकल्पक्षेत्रसंभूतध्यानाहारा हि योगिनः ॥ ९३ ॥
सान्तरावीन्द्रियार्थौ[9] चेत्संसर्गः कुत[10] एतयोः ।
निरन्तरत्वेऽप्येकत्वं कस्य केनास्तु संगतिः ॥ ९४ ॥
नाणोरणौ[11] प्रवेशोऽस्ति निराकाशः समश्च सः ।
अप्रवेशे न मिश्रत्वममिश्रत्वे न संगतिः ॥ ९५ ॥
निरंशस्य च संसर्गः कथं नामोपपद्यते ।
संसर्गे च निरंशत्वं यदि दृष्टं निदर्शय ॥ ९६ ॥
विज्ञानस्य त्वमूर्तस्य संसर्गो नैव युज्यते ।
समूहस्याप्यवस्तुत्वाद्यथा पूर्वं विचारितम्[12] ॥ ९७ ॥
तदेवं स्पर्शनाभावे वेदनासंभवः कुतः ।
किमर्थमयमायासो बाधा कस्य कुतो भवेत् ॥ ९८ ॥
यदा न वेदकः कश्चिद्वेदना च न विद्यते ।
तदावस्थामिमां दृष्ट्वा तृष्णे किं न विदीर्यसे ॥ ९९ ॥
दृश्यते स्पृश्यते वापि[13] स्वप्नमायोपमात्मना ।
चित्तेन सहजातत्वाद्वेदना तेन नेक्ष्यते ॥ १०० ॥
पूर्वं पश्चाच्च ज्ञातेन[14] स्मर्यते नानुभूयते ।

---

1) L². कदा — 2) L². ॰ष्टो — M. ॰ष्टात्किं — 3) M. बाध्यते — 4) L². ॰विभूतत्वा॰ — 5) L². ॰त्मना — 6) L². ॰मनाह्हृतन्ननु и поправлено ॰मस्य — M. कृतं — 7) L². ॰त्तस्मान्नास्त्यस्य — M. त्तस्मात्मास्त्यस्य — 8) L². ॰त्यागमन्ननु и вставлено: त т. е. ॰गतमन्न॰ — 9) L². ॰र्थो — 10) M. — L¹. संसर्गकृत — L². संसर्गकु॰ — 11) L¹. нѣтъ. — 12) L¹. ॰तः — 13) L². चापि — 14) L². ज्ञाते ज्ञानेन.

स्वात्मानं नानुभवति न[1] वान्येनानुभूयते ॥ १०१ ॥
न चास्ति वेदकः कश्चिद्वेदनातो न तत्त्वतः ।
निरात्मके कलापेऽस्मिन्क एवं बाध्यतेऽनया ॥ १०२ ॥
नेन्द्रियेषु न रूपादौ नान्तराले मनः स्थितम् ।
नाप्यन्तर्न बहिश्चित्तमन्यत्रापि न लभ्यते ॥ १०३ ॥
यन्न काये न चान्यत्र[2] न मिश्रं न पृथक् क्वचित्[3] ।
तन्न किंचिदतः सत्त्वाः प्रकृत्या परिनिर्वृताः[4] ॥ १०४ ॥
ज्ञेयात्पूर्वं यदि ज्ञानं किमालम्ब्यास्य[5] संभवः ।
ज्ञेयेन सह चेज्ज्ञानं[5] किमालम्ब्यास्य संभवः ॥ १०५ ॥
अथ ज्ञेयाद्भवेत्पश्चात्तदा ज्ञानं कुतो भवेत् ।
एवं च[6] सर्वधर्माणामुत्पत्तिर्नावशीर्यते[7] ॥ १०६ ॥
यद्येवं संवृतिर्नास्ति ततः सत्यद्वयं कुतः ।
अथ साप्यन्य[8]संवृत्या स्यात्सत्त्वो निर्वृतः कुतः ॥ १०७ ॥
परचित्तविकल्पोऽसौ स्वसंवृत्या[9] तु नास्ति सः ।
स पश्चान्नियतः सोऽस्ति न चेन्नास्त्येव संवृतिः ॥ १०८ ॥
[10]कल्पनाकल्पितं चेति द्वयमन्योन्यनिश्रितम्[11] ।
यथा प्रसिद्धमाश्रित्य विचारः सर्व उच्यते ॥ १०९ ॥
विचारितेन तु यदा विचारेण विचार्यते ।
तदानवस्था तस्यापि विचारस्य[12] विचारणात् ॥ ११० ॥
विचारिते विचार्ये तु विचारस्यास्ति नाश्रयः ।
निराश्रयत्वान्नोदेति तच्च निर्वाणमुच्यते ॥ १११ ॥
यस्य त्वेतद्द्वयं सत्यं स एवात्यन्तदुःस्थितः[13] ।
यदि ज्ञानवशादर्थो ज्ञानास्तित्वे तु[14] का गतिः ॥ ११२ ॥
अथ ज्ञेयवशाज्ज्ञानं ज्ञेयास्तित्वेऽपि का गतिः ।
अथान्योन्यवशात्सत्त्वमभावः स्याद्द्वयोरपि ॥ ११३ ॥
पिता चेन्न विना [15]पुत्रात्कुतः पुत्रस्य संभवः ।

---

1) L[2]. नाचान्येना° — 2) L[1]. चात्र — 3) L[2]. यत्; на полѣ: न क्वाचत् — 4) L[1]. °नृवृताः — 5) L[2]. किमालंवा — 6) M. चेत — 7) L[1]., M. °सीर्यते — 8) L[2]. °न्यं — 9) L[2]. स्वसंवृत्यां — 10) L[2]. °ताचेति — 11) L[2]. °निःश्रितं — 12) L[1]. нѣтъ. — 13) L[2]., M. — L[1]. °तं — 14) L[1]. нѣтъ. — 15) L[2]. पुत्रं.

पुत्राभावे पिता नास्ति तथासत्त्वं द्वयोरपि[1] ॥ ११४ ॥
अङ्कुरो जायते बीजाद्बीजं तेनैव सूच्यते ।
ज्ञेयाऽज्ञानेन ज्ञातेन तत्सत्ता[2] किं न गम्यते ॥ ११५ ॥
अङ्कुरादन्यतो ज्ञानाद्[3]बीजमस्तीति गम्यते ।
ज्ञानास्तित्वं कुतो ज्ञानं ज्ञेयं यत्तेन गम्यते ॥ ११६ ॥
लोकः[4] प्रत्यक्षतस्तावत्सर्वं हेतुमुदीक्षते ।
पद्मनालादिभेदो[5] हि हेतुभेदेन जायते ॥ ११७ ॥
किं कृतो हेतुभेदश्चेत्पूर्व[6]हेतुप्रभेदतः ।
कस्माच्चेत्फलदो हेतुः पूर्वहेतुप्रभावतः ॥ ११८ ॥
ईश्वरो जगतो हेतुर्वद कस्तावदीश्वरः ।
भूतानि चेद्भवत्येवं[7] नाममात्रेऽपि किं श्रमः[8] ॥ ११९ ॥
अपि त्वन्ये के[9]ऽनित्याश्च निश्चेष्टा न च देवताः ।
लङ्घ्याश्चाशुचयश्चैवं[10] क्ष्मादयो न स ईश्वरः ॥ १२० ॥
नाकाशमीशोऽचेष्टत्वान्नात्मा पूर्वनिषेधतः[11] ।
अचिन्त्यस्य च कर्तृत्वमप्यचिन्त्यं किमुच्यते ॥ १२१ ॥
तेन किं[12] सृष्टमिष्टं च[13] आत्मा चेन्न त्वसौ ध्रुवः ।
क्ष्मादिस्वभाव ईशश्च ज्ञानं ज्ञेयादनादि च ॥ १२२ ॥
कर्मणः सुखदुःखे च वद किं तेन निर्मितम् ।
हेतोरादिर्न[14] चेदस्ति फलस्यादिः[15] कुतो भवेत् ॥ १२३ ॥
कस्मात्सदा न कुरुते हि सो ऽन्यमपेक्षते[16] ।
[17]तेनाकृतोऽन्यो नास्त्येव तेनासौ किमपेक्षताम् ॥ १२४ ॥
[18]अपेक्षते चेत्सामग्री हेतुर्न पुनरीश्वरः ।
नाकर्तुमीशः सामग्र्यान्न[19] कर्तुं तदभावतः ॥ १२५ ॥
करोत्यनिच्छन्नीशश्चेत्परायत्तः[20] प्रसज्यते ।
इच्छन्नपीच्छायत्तः[21] स्यात्कुर्वतः कुत ईशता ॥ १२६ ॥

---

1) L²., M. तयोर्द्वयोः — 2) L². °त्ता — M. ज्ञेयाज्ज्ञातेन ज्ञानेन — 3) L¹. ज्ञात् — 4) L². लोकप्र° — L²., M. °क्ष्यते — 5) M. — L¹., L². °नाला हि — 6) L¹. पूर्व — 7) L². °द्भवंत्वे° — M. °वत्वे° — 8) L². स्रमं — 9) L²., M. त्वनेके — 10) L². °व — M. °ते — 11) L². °निषेवतः — 12) L¹. अष्णा° — L². अष्ट° — M. अष्टु° — 13) L¹. °ष्टश्च — 14) L²., M. °रादि न — 15) M. °दि — 16) L². °क्ष्यते — 17) L². तेन कृतो — 18) L²., M. अपेक्ष्यते — 19) M., L². सामग्र्यां न — M. न कर्तुस्तद° — 20) L²., M. — L¹. °रायत्तः — 21) L²., M. — L¹. °यत्तः.

येऽपि [1]नित्यानणूनाहुस्तेऽपि पूर्वं निवारिताः ।
सांख्याः प्रधानमिच्छन्ति नित्यं लोकस्य कारणम् ॥ १२७ ॥
सत्त्वं रजस्तमश्चेति गुणा [2]अविषमस्थिताः ।
प्रधानमिति कथ्यन्ते विषमैर्जगदुच्यते ॥ १२८ ॥
एकस्य त्रिस्वभावत्वमयुक्तं तेन[3] नास्ति तत् ।
एवं गुणा न विद्यन्ते प्रत्येकं ते ऽपि हि त्रिधा ॥ १२९ ॥
गुणाभावे च शब्दादेरस्तित्वमतिदूरतः[4] ।
अचेतने च वस्त्रादौ सुखादेरप्यसंभवः ॥ १३० ॥
तद्धेतुरूपाभावाच्चेन्ननु भावा विचारिताः ।
सुखाद्येव च ते हेतुर्न च तस्मात्पटादयः ॥ १३१ ॥
पटादेस्तु [5]सुखादि स्यात्तदभावात्सुखाद्यसत् ।
सुखादीनां च नित्यत्वं [6]कदाचिन्नोपलभ्यते ॥ १३२ ॥
सत्यामेव [7]सुखव्यक्तौ संवित्तिः किं न गृह्यते ।
तदेव सूक्ष्मतां याति स्थूलं सूक्ष्मं च तत्कथम् ॥ १३३ ॥
[8]स्थौल्यं त्यक्त्वा भवेत्सूक्ष्ममनित्ये [9]स्थौल्यसूक्ष्मते ।
सर्वस्य वस्तुनस्तद्वत्किं नानित्यत्वमिष्यते ॥ १३४ ॥
न स्थौल्यं चेत्सुखादन्यत्सुखस्यानित्यतास्फुटम् ।
नासदुत्पद्यते किंचिदसत्त्वादिति चेन्मतम् ॥ १३५ ॥
[10]व्यक्तस्यासत उत्पत्तिरकामस्यापि ते स्थिता ।
अन्नादो [11]ऽमेध्यभक्षः स्यात्फलं हेतौ यदि स्थितम् ॥ १३६ ॥
पटार्घेणैव कर्पासबीजं क्रीत्वा निवश्यताम् ।
मोहाच्चेन्नेक्षते लोकस्तत्त्वज्ञस्यापि [12]संस्थितिः ॥ १३७ ॥
लोकस्यापि [13]च तज्ज्ञानमस्ति कस्मान्न पश्यति ।
[14]लोकाप्रमाणतायां च व्यक्तदर्शनमप्यसत् ॥ १३८ ॥
प्रमाणमप्रमाणं चेन्ननु तत्प्रमितं मृषा ।
तत्त्वतः शून्यता [15]तस्माद्भावानां नोपपद्यते ॥ १३९ ॥

---

1) L²., M. °त्यानणूना° — 2) L²., M. अविषमं — 3) L²., M. — L¹. °युक्तेन — 4) M. °त्वमपि दूरतः — 5) L². — L¹. सुखादिः — 6) L². न कदाप्युपलभ्यते — 7) L². सुखा° — 8) M. भाव्यं — 9) L². स्थूल्यसूक्ष्मते — M. °नित्यं स्थौल्यसू° — 10) M. व्यक्तस्याप्यसदुत्प° — 11) L². °दौ — 12) L¹. सा स्थितिः — 13) L². न — 14) L². लोकाप्रमाणतानाच्च — 15) L¹. तं स्या°.

कल्पितं भावमस्पृष्ट्वा तदभावो न गृह्यते ।
तस्माद्भावो मृषा यो हि तस्याभावः स्फुटं मृषा ॥ १४० ॥
तस्मात्स्वप्ने सुते नष्टे स नास्तीति विकल्पना ।
तद्भावकल्पनोत्पादं विबध्नाति मृषा च सा ॥ १४१ ॥
तस्मादेवं विचारेण नास्ति किंचिदहेतुतः ।
न च व्यस्तसमस्तेषु प्रत्ययेषु व्यवस्थितम् ॥ १४२ ॥
अन्यतो नापि चायातं न तिष्ठति न गच्छति ।
मायातः को विशेषोऽस्य यन्मूढैः सत्यतः कृतम् ॥ १४३ ॥
मायया निर्मितं यच्च हेतुभिर्यच्च निर्मितम् ।
आयाति तत्कुतः कुत्र याति चेति निरूप्यताम् ॥ १४४ ॥
यदन्यसंनिधानेन दृष्टं न तदभावतः ।
प्रतिबिम्बसमे तस्मिन्कृत्रिमे सत्यता कथम् ॥ १४५ ॥
विद्यमानस्य भावस्य हेतुना किं प्रयोजनम् ।
अथाप्यविद्यमानोऽसौ हेतुना किं प्रयोजनम् ॥ १४६ ॥
नाभावस्य विकारोऽस्ति हेतुकोटिशतैरपि ।
तदवस्थः कथं भावः को वान्यो भावतां गतः ॥ १४७ ॥
नाभावकाले भावश्चेत्कदा भावो भविष्यति ।
नाजातेन[1] हि भावेन सो ऽभावोऽपगमिष्यति ॥ १४८ ॥
न चानपगते ऽभावे[2] भावावसरसंभवः[3] ।
भावश्चाभावतां नैति द्विस्वभावप्रसङ्गतः[4] ॥ १४९ ॥
एवं न च निरोधोऽस्ति न च भावोऽस्ति सर्वदा ।
अजातमनिरुद्धं च तस्मात्सर्वमिदं जगत् ॥ १५० ॥
स्वप्नोपमास्तु गतयो विचारे कदलीसमाः ।
निवृतानिर्वृतानां च विशेषो नास्ति वस्तुतः ॥ १५१ ॥
एवं शून्येषु भावेषु किं लब्धं किं हृतं[5] भवेत् ।
सत्कृतः परिभूतो[6] वा केन कः संभविष्यति ॥ १५२ ॥
कुतः सुखं वा दुःखं वा किं प्रियं वा किमप्रियम् ।
का तृष्णा कुत्र सा तृष्णा मृग्यमाणा स्वभावतः ॥ १५३ ॥

---

1) L². न जातेन हि — 2) L²., M. भावे — 3) M. °वाः — 4) M. द्विःप्रभाव° — 5) L²., M. — L¹. कृतं — 6) L¹. еще पि.

केन — 4) M. °त्वम-
8) M. भाव्यं — 9) L².
°ट्टौ — 12) L¹. सा

विचारे जीवलोकस्य[1] को नामात्र मरिष्यति।
को भविष्यति को भूतः को बन्धुः कस्य कः सुहृत् ॥ १५४ ॥
सर्वमाकाशसंकाशं परिगृह्णन्तु मद्विधाः।
प्रकुप्यन्ति[2] प्रहृष्यन्ति[2] कलहोत्सवहेतुभिः ॥ १५५ ॥
शोकायासैर्विषादैश्च[3] मिथश्छेदनभेदनैः।
यापयन्ति सुकृच्छ्रेण[4] पापैरात्मसुखेच्छवः ॥ १५६ ॥
मृताः पतन्त्यपायेषु दीर्घतीव्रव्यथेषु च।
आगत्यागत्य सुगतिं भूत्वा भूत्वा सुखोचिताः ॥ १५७ ॥
भवे[5] बहुप्रपाताश्च तत्र[6] वा तत्त्वमीदृशम्।
तत्रान्योन्यविरोधश्च न भवेत्तत्त्वमीदृशम्[7] ॥ १५८ ॥
तत्र चानुपमास्तीव्रा अनन्ता दुःखसागराः।
तत्रैवमल्पबलता तत्राप्यल्पत्वमायुषः ॥ १५९ ॥
तत्रापि जीवितारोग्यव्यापारैः[8] क्षुत्क्लमश्रमैः।
निद्रयोपद्रवैर्बालसंसर्गैर्निष्फलैस्तथा[9] ॥ १६० ॥
वृथैवायुर्व्रजत्याशु विवेकस्तु सुदुर्लभः।
तत्राप्यभ्यस्तविक्षेपनिवारणगतिः[10] कुतः ॥ १६१ ॥
तत्रापि मारो यतते महापायप्रपातने।
तत्रासन्मार्गबाहुल्यं विचिकित्सा च दुर्जया ॥ १६२ ॥
पुनश्च क्षणदौर्लभ्यं बुद्धोत्पादोऽतिदुर्लभः।
क्लेशौघो दुर्निवारश्चेत्यहो दुःखपरंपरा ॥ १६३ ॥
अहो बतातिशोच्यत्वमेषां दुःखौघवर्तिनाम्।
ये नेक्षन्ते[11] स्वदौःस्थित्यमेवमप्यतिदुःस्थिताः ॥ १६४ ॥
स्नात्वा स्नात्वा यथा कश्चिद्विशेद्वह्निं मुहुर्मुहुः।
स्वसौस्थित्यं च मन्यन्त[12] एवमप्यतिदुःस्थिताः ॥ १६५ ॥
अजरामरलीलानामेवं विहरतां सताम्।
आयास्यन्त्यापदो घोराः कृत्वा[13] मरणमग्रतः ॥ १६६ ॥
एवं दुःखाग्नितप्तानां शान्तिं कुर्यामहं कदा।

1) M. जीवलोकः कः को — 2) L². °न्ते — 3) L¹., L². — M. °शौः — 4) L². поправка: च कृ° — 5) L². भवेत ब° — 6) L¹. चा — 7) L²., M. भवे — M. °विरुद्ध° — 8) L². °रोगाव्या° — 9) L². निद्रवो° — 10) M. °विक्षेपो — 11) M. नेक्ष्यन्ते — 12) L¹. मर्त्यन्ते — L²., M. °न्ते° — 13) L². स्मृत्वा.

पुण्यमेघसमुद्भूतैः सुखोपकरणैः[1] स्वकैः ॥ १६७ ॥
कदोपलम्भदृष्टिभ्यो देशयिष्यामि शून्यताम् ।
संवृत्यानुपलम्भेन पुण्यसंभारमादरात् ॥ १६८ ॥

बोधिचर्यावतारे प्रज्ञापारमितापरिच्छेदो नवमः ॥

बोधिचर्यावतारं मे यद्विचिन्तयतः[2] शुभम् ।
तेन सर्वे जनाः सन्तु बोधिचर्याविभूषणाः ॥ १ ॥
सर्वासु दिक्षु यावन्तः कायचित्तव्यथातुराः ।
ते प्राप्नुवन्तु मत्पुण्यैः सुखप्रामोद्यसागरान् ॥ २ ॥
आसंसारं सुखच्यानिर्माभूत्तेषां कदाचन ।
बोधिसत्त्वसुखं प्राप्तं भवत्यविरतं[3] जगत् ॥ ३ ॥
यावन्तो नरकाः[4] केचिद्विद्यन्ते लोकधातुषु ।
सुखावतीसुखामोद्यैर्[5]मोदन्तां तेषु देहिनः ॥ ४ ॥
शीतार्ताः प्राप्नुवन्तूष्णमुष्णार्ताः सन्तु शीतलाः ।
[6]बोधिसत्त्वमहामेघसंभवैर्जलसागरैः ॥ ५ ॥
[7]असिपत्त्रवनं तेषां स्यान्नन्दनवनद्युतिः ।
कूटशाल्मलीवृक्षाश्च जायन्तां कल्पपादपाः ॥ ६ ॥
कादम्बकारण्डवचक्रवाकहंसादिकोलाहलरम्यशोभैः[8] ।
[9]सरोभिरुद्दामसरोजगन्धैर्भवन्तु हृद्या नरकप्रदेशाः ॥ ७ ॥
सो[10]ऽङ्गारराशिर्मणिराशिरस्तु तप्ता च भूः स्फाटिककुट्टिमं[11] स्यात् ।
भवन्तु संघातमहीधराश्च पूजाविमानाः[12] सुगतप्रपूर्णाः ॥ ८ ॥
अङ्गारतप्तोपलशस्त्रवृष्टिरद्यप्रभृत्यस्तु च पुष्पवृष्टिः ।
तच्छस्त्रयुद्धं च परस्परेण क्रीडार्थमद्यास्तु च पुष्पयुद्धम् ॥ ९ ॥
पतितसकलमांसाः कुन्दवर्णास्थिदेहा दहनसमजलायां वैतरण्यां निमग्नाः ।
मम कुशलबलेन प्राप्तदिव्यात्मभावाः सह सुरवनिताभिः सन्तु मन्दाकिनीस्थाः ॥ १० ॥

---

1) L². °पकरणाम्बुभिः — 2) L¹. °चिन्तयतः — 3) L²., M. °वत्वविरतं — M. °त्वविरतं — 4) L². नारकाः — 5) L². °सुखामोदै° — M. °सुखात्मोदै — 6) L¹. सबो° — 7) L². असि असि वनन्तेषां — 8) L². вторая половина стиха вытерта. — 9) M. शरोभिरुद्दामशरोज° — 10) L². °राशिमणि° — M. अङ्गार° — 11) L². °कुटिमं — 12) L¹. विमाः.

त्रस्ताः पश्यन्त्वकस्माद्दिह[1] यमपुरुषाः काकगृध्राश्च घोरा
ध्वान्तं ध्वस्तं समन्तात्सुखरतिजननी कस्य सौम्या प्रभेयम् ।
इत्यूर्ध्वं प्रेक्षमाणा गगनतलगतं वज्रपाणिं ज्वलन्तं
दृष्ट्वा प्रमोद्यवेगाद्व्यपगतदुरितायां तु तेनैव सार्धम् ॥ ११ ॥
पतति[2] कमलवृष्टिर्गन्धपानीयमिश्राच्छमितिनरकवह्निं दृश्यते नाशयन्ती ।
किमिदमिति सुखेना[3]ह्लादितं नाकस्माद्भवतु कमलपाणेर्दर्शनं नारकाणाम् ॥ १२ ॥
आयातायात शीघ्रं भयमपनयत भ्रातरो जीविताः स्मः
संप्राप्तोऽस्माकमेष ज्वलदभयकरः[4] कोऽपि चीरीकुमारः ।
सर्वं यस्यानुभावाद्व्यसनमपगतं प्रीतिवेगाः प्रवृत्ताः
जातं संबोधिचित्तं सकलजनपरित्राणमाता दया[5] च ॥ १३ ॥
पश्यन्त्वेनं भवन्तः[6] सुरशतमुकुटैरर्च्यमानाङ्घ्रिपद्मं[7]
कारुण्यादार्द्रदृष्टिं शिरसि निपतितानेकपुष्पौघवृष्टिम् ।
कूटागारैर्मनोज्ञैः स्तुतिमुखरसुरस्त्रीसहस्रोपगीतै-
र्दृष्ट्वाग्रे[8] मञ्जुघोषं भवतु कलकलः सांप्रतं नारकाणाम् ॥ १४ ॥
इति मत्कुशलैः समन्तभद्रप्रमुखानावृतबोधिसत्त्वमेघान् ।
सुखशीतसुगन्ध[9]वातवृष्टीनभिनन्दन्तु[10] विलोक्य नारकास्ते ॥ १५ ॥
शाम्यन्तु वेदनास्तीव्रा नारकाणां भयानि च ।
दुर्गतिभ्यो विमुच्यन्तां[11] सर्वदुर्गतिवासिनः[12] ॥ १६ ॥
अन्योन्यभक्षणभयं तिरश्चामपगच्छतु ।
भवन्तु सुखिनः प्रेता[13] यथोत्तरकुरौ नराः ॥ १७ ॥
संतर्प्यन्तां प्रेताः स्नाप्यन्तां शीतला भवन्तु सदा ।
आर्यावलोकितेश्वरकरगलितक्षीरधाराभिः ॥ १८ ॥
अन्धाः पश्यन्तु रूपाणि शृण्वन्तु बधिराः सदा ।
[14]गर्भिण्यश्च प्रसूयन्तां मायादेवीव निर्व्यथाः ॥ १९ ॥
वस्त्रभोजनपानीयं[15] स्रक्चन्दनविभूषणम् ।

---

1) Оба слова только въ M. — $L^1$., $L^2$. вытерто. — 2) $L^2$. पतितु, °वृष्टिग° — 3) $L^2$., M. सुखेनाह्लादितानाम° — 4) $L^1$. °भकरः — 5) $L^2$. °त्राणमात्रादयाच — $L^1$. °त्राणंमाता दया च — 6) $L^2$. °न्तुः — 7) $L^2$., M. °नांघ्रि° — 8) $L^2$., M. दृष्टेत्थं — 9) M. °गन्धि° — 10) $L^2$. विलोक° — 11) $L^2$. विमुच्यन्ते — 12) M. двустишіе выпущено — $L^1$. на полѣ. — 13) M. प्रेताः — 14) $L^2$., M. गुर्विण्यश्च — 15) $L^2$., M. — $L^1$. अत्कश्च°.

मनोभिलषितं सर्वं लभन्तां हितसंहितम् ॥ २० ॥
भीताश्च निर्भयाः सन्तु शोकार्ताः प्रीतिलाभिनः ।
उद्विग्नाश्च निरुद्वेगा धृतिमन्तो[1] भवन्तु च ॥ २१ ॥
आरोग्यं रोगिणामस्तु मुच्यन्तां सर्वबन्धनात् ।
दुर्बला बलिनः सन्तु स्निग्धचित्ताः परंपरम् ॥ २२ ॥
सर्वा दिशः शिवाः सन्तु सर्वेषां पथि वर्तिनाम् ।
येन कार्येण गच्छन्ति तदुपायेन सिध्यतु ॥ २३ ॥
नौयानयात्रारूढाश्च[2] सन्तु सिद्धमनोरथाः ।
क्षेमेण कूलमासाद्य रमन्तां सह बन्धुभिः ॥ २४ ॥
कान्तारोन्मार्गपतिता लभन्तां सार्थसंगतिम् ।
[3]अश्रमेण च गच्छन्तु चौरव्याघ्रादिनिर्भयाः ॥ २५ ॥
सुप्तमत्तप्रमत्तानां व्याध्या[4]रण्यादिसंकटे ।
अनाथबालवृद्धानां रक्षां कुर्वन्तु देवताः ॥ २६ ॥
सर्वाक्षणविनिर्मुक्ताः श्रद्धाप्रज्ञाकृपान्विताः ।
[5]आकाराचारसंपन्नाः सन्तु जातिस्मराः सदा ॥ २७ ॥
भवन्त्वक्षयकोशाश्च[6] यावद्गगनगञ्जवत् ।
निर्द्वन्द्वा निरुपायासाः[7] सन्तु स्वाधीनवृत्तयः ॥ २८ ॥
अल्पौजसश्च ये सत्त्वास्ते भवन्तु महौजसः ।
भवन्तु रूपसंपन्ना ये विरूपास्तपस्विनः ॥ २९ ॥
याः काश्चन स्त्रियो लोके पुरुषत्वं व्रजन्तु ताः ।
प्राप्नुवन्तूच्चतां नीचा[8] हतमाना भवन्तु च ॥ ३० ॥
अनेन मम पुण्येन सर्वे सत्त्वा अशेषतः ।
विरम्य सर्वपापेभ्यः कुर्वन्तु कुशलं सदा ॥ ३१ ॥
बोधिचित्ताविरहिता बोधिचर्यापरायणाः ।
बुद्धैः परिगृहीताश्च मारकर्मविवर्जिताः ॥ ३२ ॥
अप्रमेयायुषश्चैव सर्वसत्त्वा भवन्तु ते[9] ।
नित्यं जीवन्तु सुखिता मृत्युशब्दोऽपि नश्यतु ॥ ३३ ॥

---

1) M. धृतिवन्तो — 2) L². °यात्रारूढाश्च — M. °पत्रारू° — 3) L². अश्रमेणैव — 4) L²., M. व्याधा° — 5) L². आचाराचार° — 6) L². °क्षयभोगाश्च — 7) L²., M. निरूपा° — 8) L². °च्चता नीचा — 9) M., L¹. нѣтъ — L². ते зачеркнуто и вставлено हे.

रम्याः कल्पद्रुमोद्यानैर्दिशः सर्वा भवन्तु च ।
बुद्धबुद्धात्मजाकीर्णा धर्मध्वनिमनोहरैः ॥ ३४ ॥
[1] शर्करादिव्यपेता च समा पाणितलोपमा ।
मृद्वी च वैडूर्यमयी भूमिः सर्वत्र तिष्ठतु ॥ ३५ ॥
बोधिसत्त्वमहापर्षन्मण्डलानि समन्ततः ।
निषीदन्तु स्वशोभाभिर्मण्डयन्तु महीतलम् ॥ ३६ ॥
पक्षिभ्यः सर्ववृक्षेभ्यो रश्मिभ्यो गगनादपि ।
धर्मध्वनिरविश्रामं श्रूयतां सर्वदेहिभिः ॥ ३७ ॥
बुद्धबुद्धसुतैर्नित्यं लभन्तां ते समागमम् ।
पूजामेघैरनन्तैश्च पूजयन्तु जगद्गुरुम् ॥ ३८ ॥
देवो वर्षतु कालेन शस्यसंपत्तिरस्तु च ।
स्फीतो भवतु लोकश्च राजा भवतु धार्मिकः ॥ ३९ ॥
शक्ता भवन्तु चौषध्यो मन्त्राः सिध्यन्तु जापिनाम् ।
[2] भवन्तु करुणाविष्टा डाकिनी[3]राक्षसादयः ॥ ४० ॥
मा कश्चिद्दुःखितः सत्त्वो मा पापी मा च रोगितः[4] ।
मा हीनः परिभूतो वा माभूत्कश्चिच्च दुर्मनाः ॥ ४१ ॥
पाठस्वाध्यायकलिला विहाराः सन्तु सुस्थिताः ।
[5] नित्यं स्यात्संघसामग्री संघकार्यं च सिध्यतु ॥ ४२ ॥
विवेकलाभिनः सन्तु शिक्षाकामाश्च भिक्षवः ।
कर्मण्यचित्ता ध्यायन्तु सर्वविक्षेपवर्जिताः ॥ ४३ ॥
लाभिन्यः सन्तु भिक्षुण्यः कलहायासवर्जिताः ।
भवन्त्वखण्डशीलाश्च सर्वे प्रव्रजितास्तथा ॥ ४४ ॥
दुःशीलाः सन्तु संविग्नाः पापक्षयरताः सदा ।
सुगतेर्लाभिनः सन्तु तत्र चाखण्डितव्रताः ॥ ४५ ॥
पण्डिताः संस्कृताः सन्तु लाभिनः पैण्डपातिकाः ।
[6] भवन्तु शुद्ध[7]संतानाः सर्वदिक्ख्यातकीर्तयः ॥ ४६ ॥
अभुक्त्वापायिकं दुःखं विना दुष्करचर्यया ।

---

1) L²., M. °कीर्णोर्धर्म° — 2) L². शक्त्या — 3) M. डाकिन्यो — 4) L². °गिनः поправка вм. °तः — M. °कः — L¹. °गिणः — 5) M. °लीला — 6) L¹. поправка вм. प्राकृ — L²., M. सत्कृताः — 7) L²., M. — L¹. अद्ध°.

दिव्येनैकेन कायेन जगद्बुद्धत्वमाप्नुयात् ॥ ४७ ॥
पूज्यन्तां सर्वसंबुद्धाः[1] सर्वसत्त्वैरनेकधा ।
अचिन्त्यबौद्धसौख्येन सुखिनः[2] सन्तु भूयसा ॥ ४८ ॥
सिध्यन्तु बोधिसत्त्वानां जगदर्थं मनोरथाः[3] ।
यच्चिन्तयन्ति[4] ते नाथास्तत्सत्त्वानां समृध्यतु ॥ ४९ ॥
प्रत्येकबुद्धाः सुखिनो भवन्तु श्रावकास्तथा ।
देवासुरनरैर्नित्यं पूज्यमानाः[5] सगौरवैः ॥ ५० ॥
जातिस्मरत्वं प्रव्रज्यामहं च प्राप्नुयां सदा ।
यावत्प्रमुदिताभूमिं[6] मञ्जुघोषपरिग्रहात् ॥ ५१ ॥
येन तेनासनेनाहं यापयेयं बलान्वितः ।
विवेकवाससामग्रीं प्राप्नुयां सर्वजातिषु ॥ ५२ ॥
यदा च द्रष्टुकामः स्यां[7] प्रष्टुकामश्च किंचन ।
तमेव नाथं पश्येयं मञ्जुनाथमविघ्नतः[8] ॥ ५३ ॥
दशदिग्व्योमपर्यन्त[9]सर्वसत्त्वार्थसाधने ।
यथा चरति मञ्जुश्रीः सैव चर्या भवेन्मम ॥ ५४ ॥
आकाशस्य स्थितिर्यावद्यावच्च जगतः स्थितिः ।
तावन्मम स्थितिर्भूयाज्जगद्दुःखानि निघ्नतः ॥ ५५ ॥
यत्किंचिज्जगतो दुःखं तत्सर्वं मयि पच्यताम् ।
बोधिसत्त्वशुभैः सर्वैर्जगत्सुखितमस्तु च ॥ ५६ ॥
जगद्दुःखैकभैषज्यं[10] सर्वसंपत्सुखाकरम् ।
लाभसत्कारसहितं चिरं तिष्ठतु शासनम् ॥ ५७ ॥
मञ्जुघोषं नमस्यामि यत्प्रसादान्मतिः शुभे ।
कल्याणमित्रं वन्देऽहं[11] यत्प्रसादाच्च वर्धत इति ॥ ५८ ॥

बोधिचर्यावतारे परिणामनापरिच्छेदो दशमः[12] ॥

---

1) L². °बुद्धास्तु и полѣ: सं — 2) M. सुखिताः — 3) L²., M. जगदर्थमनो° — 4) L². यच्चित्तं यान्ति — 5) M. только त्यमानाः — 6) M. °मंी — 7) M. स्प्रष्टु° — 8) L². °घोषम° — M. еще: यदा संभृतसंभारो मञ्जुघोषव्यपाश्रयात् । तदा ज्ञानार्थमध्यस्थश्चरेयं कल्पसागरान् ॥ — 9) M. °र्यन्तं — 10) L². सर्वं — 11) L¹. °त्रमन्दाहं — 12) L²., M. еще समाप्तः — И только въ L¹. समाप्तोऽयं बोधिचर्यावतारः । कृतिराचार्यशान्तिदेवस्य मञ्जुघोषप्रासादादिति ॥, (°प्रसा°?) — Въ L². स्वम्परम्परिवर्तेत भावेनैव सदा सुधीः । वाक्ये ऽध्यात्मन्येनासक्तो यस्तम्वन्दे सदादरात्(:) ॥



°गिनः поправка вм.
- L²., M. सत्कृताः —

Çа̄нтидева не упоминается ни Сюанъ-цзаномъ, ни И-цзиномъ, но зато Та̄ра̄на̄тха посвящаетъ его біографіи и описанію его чудесъ нѣсколько страницъ [1]), а въ Субха̄шита̄вали [2]) онъ цитуется подъ именемъ бодхисаттвы, иначе сопричисляется къ тѣмъ существамъ, которыя, по ученію Маха̄янистовъ, многотрудныя дѣла вершатъ, и грядутъ къ уразумѣнію высокой, святой истины. Они свершаютъ *па̄рамиты*, и не желаютъ вступать въ нирва̄ну; узрѣвъ скорбящія существа, они пугаются нирва̄ны [3]). Бодхисаттвы живутъ въ мірѣ, на пользу всѣмъ существамъ; они блаженны, какъ блаженны въ мірѣ всѣ тѣ, «кто вожделѣетъ благо другому, скорбитъ здѣсь тотъ, кто ищетъ собственнаго счастья» [4]). Нашъ авторъ имѣетъ и другую характеристику: «Çа̄нтидеву и Чандрагомина, говоритъ Та̄ра̄на̄тха, всѣ мудрецы провозгласили двумя *чудесными учителями* (чудотворцами)» [5]). Эта послѣдняя характеристика сдѣлана писателемъ, принадлежавшимъ къ школѣ тантрійской, и въ духѣ же этого ученія онъ изложилъ жизнеописаніе Çа̄нтидевы въ своей исторіи; въ сочиненіяхъ же Çа̄нтидевы, сохранившихся въ оригиналѣ [6]), нѣтъ, однакоже, никакихъ слѣдовъ принадлежности автора къ тантрійской школѣ. Только въ одной рукописи [7]) находится приписка, въ которой нельзя не признать намека на одну изъ легендъ, сообщаемыхъ Та̄ра̄на̄тхой; въ упомянутой припискѣ говорится о выше напечатанномъ сочиненіи, что оно «твореніе учителя Çа̄нтидевы по благоволенію Ман́жугхоши». Та̄ра̄на̄тха же разсказываетъ, что Çа̄нтидева, «предаваясь внутри себя созерцанію ученія отъ а̄рја-Ман́жуçрӣ, составилъ превосходныя сочиненія Çикша̄самуччаја и Сӯтрасамуччаја» [8]). Въ этомъ мѣстѣ, дѣйствительно, не упоминается выше напечатанное сочиненіе, но особливое покровительство Ман́жуçрӣ нашему автору засвидѣтельствовано въ другихъ мѣстахъ біографіи; о немъ говорится, что «онъ постоянно видѣлъ Ман́жуçрӣ» [9]), т. е. находился съ нимъ въ сверхъестественномъ общеніи. «Съ малолѣтства во снѣ являлся ему Ман́жуçрӣ» [10])— Çа̄нтидева былъ сынъ царя въ Саураштра, но по внушенію Ман́жуçрӣ «убѣжалъ изъ дому, вечеромъ нака-

---

1) *Васильевъ*, Буддизмъ, III, стр. 165 — 169.

2) The Subhāshitāvali, p. 73; стихъ 3313 взятъ изъ напечатаннаго выше текста, I. 4.

3) Ашṭаса̄хасрика̄-Пражн́а̄па̄рамита̄, 293.

4) См. выше VIII, 129.

5) *Васильевъ*, III, 6.

6) На санскритскомъ языкѣ кромѣ выше напечатаннаго сочиненія сохранился еще одинъ трудъ Çа̄нтидевы — Çикша̄самуччаја.

7) L¹. Описаніе ея см. выше. Срав. также X. 53 и сл.

8) Тамъ-же III, 166.

9) Тамъ-же.

10) Тамъ-же, 165.

нунѣ избранія на престолъ» и затѣмъ поступилъ въ духовное званіе въ Наландѣ. Живя здѣсь, онъ предавался «внутри себя созерцанію ученія отъ Ārја-Маńжуçрī»; тибетскій историкъ прибавляетъ далѣе, «однакоже, хотя онъ помѣщалъ въ душѣ своей все безъ исключенія ученіе, но, спя днемъ и ночью, показывалъ по наружности предъ другими, что вовсе не занимается ни слушаніемъ, ни размышленіемъ, ни созерцаніемъ».—Среди его сотоварищей установилось мнѣніе, что Çāнтидева праздный тунеядецъ; съ цѣлью избавиться отъ него, они назначили очередное чтеніе. «Сказали Çāнтидевѣ, что ему нужно читать сӯтры; онъ сначала не соглашался, но послѣ усильныхъ настояній сказалъ: «ну такъ устройте каѳедру, я стану читать». Это возбудило въ нѣкоторыхъ недоразумѣніе, но бо̀льшая часть собралась для посрамленія его. Учитель, сѣвъ на львиный тронъ, спросилъ, желаютъ ли, чтобъ онъ читалъ уже прежде бывшее (старое) или небывалое, и всѣ для испытанія сказали, чтобъ онъ читалъ новое. Тогда онъ сталъ произносить сочиненное имъ Бодхисаттва-чарјāватāра (sic) и послѣ словъ: «когда все матеріальное и нематеріальное не существуетъ предъ умомъ (въ умѣ)» [1]) поднялся на воздухъ и, хотя тѣло его сдѣлалось невидимо, но слова его непрекращались (и такимъ образомъ) онъ произнесъ все (сочиненіе) Чарјāватāра» [2]).

Проповѣдь была записана слушателями, и, слѣдуя дальнѣйшему разсказу Тāрāнāтхи, еще при жизни Çāнтидевы среди буддистовъ, въ обращеніи были три редакціи его сочиненія; одна редакція была у кашмирцевъ и состояла изъ 1000 çлокъ; «вступительное поклоненіе они сами придѣлали изъ своего ума»; вторая редакція была у восточныхъ; она была кратче первой, состояла только изъ 700 çлокъ; въ ней поклоненіе взято изъ Муламадхјамики, и недоставало ни главы о покаяніи, ни главы о Пражнā. Третья редакція записана пандитами Мадхјадесы; въ ней не было ни поклоненія, ни изложенія причинъ сочиненія, но съ помѣщенными на концѣ похвалой и предписаніями (Мантрами) вышло 1000 çлокъ. Самъ Çāнтидева признавалъ подлинною третью редакцію. «О Чарјāватāрѣ, говоритъ Тāрāнāтха, онъ (т. е. Çāнтидева) отозвался, что оно точно таково, какъ записали его Мадхјадесцы». Выше напечатанный текстъ отличается отъ всѣхъ трехъ редакцій: его вступленіе I. 1—4. повторяется и въ другомъ сочиненіи Çāнтидевы, именно, въ Çикшāсамуччаѣ; стиховъ въ немъ всего 918, меньше нежели въ первой и въ третьей редакціяхъ и больше нежели во второй.

Время жизни Çāнтидевы можетъ быть опредѣлено только съ прибли-

---

1) См. выше IX, 35.
2) *Васильевъ*, III, 167.

зительною точностью, но съ большимъ вѣроятіемъ. Онъ принялъ посвященіе, по разсказамъ его біографа, въ Нāландѣ, гдѣ учителемъ его былъ Жајадева, ученикъ Дхармапāлы. Дхармапāла упоминается и Сюанъ-цзаномъ и И-цзиномъ. По словамъ послѣдняго [1]), великій учитель жилъ во времена ближайшія къ VII вѣку; между нимъ и Çāнтидевою прошло одно поколѣніе, и едва ли будетъ большою смѣлостью признавать нашего автора современникомъ знаменитыхъ китайскихъ паломниковъ. Они его не называютъ, можетъ быть, потому что сочиненія его еще не пользовались большой извѣстностью, во время ихъ пребыванія въ Индіи.

1) См. выше, стр. 32.

**И. Минаевъ.**

creative commons

## Attribution-NonCommercial-ShareAlike 3.0 Unported

### You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

### Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

### With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer